ॐनमोब्रह्मादिभ्योब्रह्मविद्यासंप्रदायकर्तृभ्योवंशऋषिभ्योनमोगुरुभ्यः॥प्रणम्यभगवत्पादा
न्श्रीधरादीश्चसद्गुरून्॥संप्रदायानुसारेणगीताव्याख्यांसमारभे॥भारतंसर्ववेदार्थोभारता
र्थश्चकृत्स्नशः॥गीतायामस्तितेनेयंसर्वशास्त्रमयीमता॥कर्मोपास्तिज्ञानभेदैःशास्त्रंकांडत्रया
त्मकं॥अन्यत्तूपासनाकांडात्तृतीयोनातिरिच्यते॥तदेवब्रह्मविद्धिलंमदंयत्तदुपासते॥इति
श्रुत्यैववेद्यस्यह्युपास्यादन्यत्तरिता॥इयमष्टादशाध्यायीक्रमात्षट्कत्रिकेणहि॥कर्मोपास्ति
ज्ञानकांडत्रितयात्मानिगद्यते॥९॥तत्रयुद्धोयमंश्रुत्वोत्सुकादर्जुनंप्रतिजिज्ञासुर्भगवांस्तदा
वाच॥ श्रीरामकृष्णवासुदेवायनमः॥

धर्मक्षेत्रेति।तत्रवेदेतेषांकुरुक्षेत्रंदेवयजनमासनिकर्मकांडप्रसिद्धंकुरुक्षेत्रमन्यत्।अविमुक्तंवैकुरुक्षेत्रंदेवा
नांदेवयजनंसर्वेषांभूतानांब्रह्मसदनमित्यविमुक्तारव्यंब्रह्मप्राप्तिस्थानभूतंकुरुक्षेत्रमन्यन्तेब्रह्मसद्म
त्वंवास्यअत्रहिजंतोःप्राणेषूत्क्रममाणेषुरुद्रस्तारकंब्रह्मव्याचष्टेयेनासावमृतीभूत्वामोक्षीभवतीति

धृतराष्ट्रउवाच॥धर्मक्षेत्रेकुरुक्षेत्रेसमवेतायुयुत्सवः॥मामकाःपांडवाश्चैवकिमकुर्वतसंजय॥१॥

वाक्यशेषेणव्युत्पादितं।एतद्व्यावृत्त्यर्थंधर्मक्षेत्रेइतिविशेषणंकुरुदेशांतर्गतंहिकुरुक्षेत्रंधर्मक्षेत्रमे
वनतुतद्ब्रह्मसदनंप्रवर्ग्यकोऽत्तस्यधर्मक्षेत्रत्वमात्रंश्रवणात्।तत्रसमवेताःयुयुत्सवोयोद्धुमिच्छ ॥९७॥
वःपांडवानांपृथग्ग्रहणंतेषुममत्वाभावसूचनार्थं॥१॥श्रीरामकृष्णवासुदेव॥सांबसदाशिवहरि॥

व्यूढंव्यूहरचनयास्थितंआचार्यद्रोणंराजादुर्योधनःराजाब्रवीदित्यवसिद्धवचनपदनसंक्षिप्तबहुक्रियत्वादि
गुणत्वंवाक्यस्यसूच्यते॥२॥द्रुपदपुत्रेणेतिपूर्ववैरस्मरणेनक्रोधोद्दीपनार्थंविशेषणं॥३॥महेष्वासाःम

संजयउवाच॥दृष्ट्वातुपांडवानीकंव्यूढंदुर्योधनस्तदा॥आचार्यमुपसंगम्यराजावचनमब्रवी
त्॥२॥पश्यैतांपांडुपुत्राणामाचार्यमहतीचमूं॥व्यूढांद्रुपदपुत्रेणतवशिष्येणधीमता॥३॥
अत्रशूरामहेष्वासाभीमार्जुनसमायुधि॥युयुधानोविराटश्चद्रुपदश्चमहारथः॥४॥धृष्टके
तुश्चेकितानःकाशिराजश्चवीर्यवान्॥पुरुजित्कुंतिभोजश्चशैब्यश्चनरपुंगवः॥५॥

हांतरेष्वासाःधनूंषियेषांते।युयुधानःसात्यकिःद्रुपदश्चमहारथइत्येकः॥४॥धृष्टकेतादयःपंच॥५॥श्रीः॥

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

युधामन्युश्चेत्यादि। सौमदत्तेर्भूरिश्रवसोऽभिमन्युः पर्वद्रौपदेयांप्रतिविंध्यादयश्चेतिअष्टोवकारात्पांडवाघटो
त्कचादयश्चातिप्रसिद्धाग्राह्याः सर्वेपिमहारथाएवतल्लक्षणंतुएकादशमहस्राणियोधयेद्यस्तुध
न्विनांशास्त्रशास्त्रप्रवीणश्चसवेप्रोक्तोमहारथः॥अमितान्योधयेद्यस्तुसप्रोक्तोतिरथस्तुसः।रथस्ते

युधामन्युश्चविक्रांतउत्तमौजाश्चवीर्यवान्॥सौभद्रोद्रौपदेयाश्चसर्वएवमहारथाः॥६॥
अस्माकंतुविशिष्टायेतान्निबोधद्विजोत्तम॥नायकाममसैन्यस्यसंज्ञार्थंतान्ब्रवीमिते॥७॥

केनयोद्वास्यान्न्यूनोधिरथःस्मृतइति॥६॥विशिष्टाःश्रेष्ठाःनिबोधबुध्यस्वभीष्मादिकथ्यपूरणमेपदिनोबुधीरिदं ॥९८॥
रूपंसंज्ञार्थेअस्मत्पक्षेपिशूराःसंतीतिज्ञापनार्थंपरेषुप्राबल्यंदृष्ट्वातवात्साहभंगोमाभूदित्यर्थः॥७॥श्रीः॥

विकर्णःस्वभ्राता।सौमदत्तिर्भूरिश्रवाःजयद्रथपदस्थानेतथैववेतिकश्चित्पाठः॥८॥अन्येन्या
ल्यकृतवर्मप्रभृतयःशस्त्राणिविदारकाणिखड्गादीनिप्रहरणानिकेवलंप्रहारार्थानिगदादी

भवान्भीष्मश्चकर्णश्चकृपश्चसमितिंजयः॥अश्वत्थामाविकर्णश्चसौमदत्ति
स्तथैवच॥८॥अन्येचबहवःशूरामदर्थेत्यक्तजीविताः॥नानाशस्त्रप्रहरणाः
सर्वेयुद्धविशारदाः॥९॥
नि॥नानाविधानियेषांतेनानाशस्त्रप्रहरणाः॥९॥ श्रीरामकृष्णवासुदेवायनमः॥सांबशिव॥

पर्याप्तंपरितआप्तंव्याप्तंपरिवेष्टितं।पांडवसैन्यंहिसप्ताक्षौहिणीभितत्वादल्पंबहुनैकादशाक्षौहिणीभिते
नास्मत्सैन्येनवेष्टयितुंशक्यंननुतदीयनास्मदीयमित्यर्थःएवंचपर्याप्तमित्यस्यपारणीयमित्यर्थः॥१०॥

अपर्याप्तंतदस्माकंबलंभीष्माभिरक्षितं॥पर्याप्तंत्विदमेतेषांबलंभीमाभिरक्षितं॥१०॥
अयेनषुचसर्वेषुयथाभागमवस्थिताः॥भीष्ममेवाभिरक्षंतुभवंतःसर्वएवहि॥११॥

अयेनषुव्यूहस्वनयास्थितेसैन्यप्रवेशमार्गेषुस्वेस्वेस्थानेस्थितायूयंमध्यस्थंभीष्ममेवाभिरक्षंतु॥ ॥९९॥
अस्यसेनापतेःमांवाल्यसर्वोपिसेनाआकुलोभवत्तत्रयेयंस्थिरावभवेदतःसएवरक्ष्यइत्यर्थः॥११॥

तस्यएवंवदतोदुर्योधनस्यसंजयवाक्यमिदं।सिंहनादमितिणमुलंतं।तेनविनद्येत्यस्यानुप्रयोगःकृषा
दित्वात्समूलकाषंकृषतिस्मदेत्यानित्यादिवत्कुरुवृद्धोभीष्मःप्राग्विराट्नगरादौदृष्टप्रभावान्दृष्ट्वा

तस्यसंजनयन्हर्षंकुरुवृद्धःपितामहः॥सिंहनादंविनद्योच्चैःशंखंदध्मौप्रतापवान्॥१२॥
ततःशंखाश्चभेर्यश्चपणवानकगोमुखाः॥सहसैवाभ्यहन्यंतसशब्दस्तुमुलोभवत्॥१३॥

राज्ञोभयंमाभूदितिशंखंदध्मौ।हर्षयुद्धोत्साहंजनयन्हेत्वर्थेक्तप्रत्ययःहर्षजननार्थमित्यर्थः॥१२॥
अभ्यहन्यंतअभिहताःकर्मकर्तरिप्रयोगः॥१३॥ श्रीरामकृष्णवासुदेवाभ्यनमः॥

ततःश्वेतैर्हयैर्युक्तेमहतिस्यंदनेस्थितौ॥माधवःपांडवश्चैवदिव्यौशंखौप्रदध्मतुः॥१४॥पांचज
न्यंहृषीकेशोदेवदत्तंधनंजयः॥पौंड्रंदध्मौमहाशंखंभीमकर्मावृकोदरः॥१५॥अनंतविजयंराजा
कुंतीपुत्रोयुधिष्ठिरः॥नकुलःसहदेवश्चसुघोषमणिपुष्पकौ॥१६॥काश्यश्चपरमेष्वासःशिखं
डीचमहारथः॥धृष्टद्युम्नोविराटश्चसात्यकिश्चापराजितः॥१७॥द्रुपदोद्रौपदेयाश्चसर्वशःपृथिवी
पते॥सौभद्रश्चमहाबाहुःशंखान्दध्मुःपृथक्पृथक्॥१८॥सघोषोधार्तराष्ट्राणांहृदयानिव्यदार
यत्॥नभश्चपृथिवींचैवतुमुलोव्यनुनादयन्॥१९॥

॥१००॥

व्यवस्थितान्प्रभयोद्विग्नतयावैषम्येणावस्थितान्कपिध्वजपांडवपदाभ्यांभीषणध्वजत्वंशौर्यंवप्रदृश्यते
॥२०॥हृषीकेशंसर्वेषामिंद्रियाणांप्रवर्तकत्वेनपरिचिन्नन्नं।वाक्यमेवाहनतुकंचिदर्थमितिद्योतनार्थंवाक्य

अथव्यवस्थितान्दृष्ट्वाधार्तराष्ट्रान्कपिध्वजः॥प्रवृत्तेशस्त्रसंपातेधनुरुद्यम्यपांडवः॥२०
हृषीकेशंतदावाक्यमिदमाहमहीपते॥सेनयोरुभयोर्मध्येरथंस्थापयमेऽच्युत॥२१॥याव
देतान्निरीक्ष्येहंयोद्धुकामानवस्थितान्॥कैर्मयासहयोद्धव्यमस्मिन्रणसमुद्यमे॥२२॥

पदं।वाक्यमेवाहसेनयोरिति॥२१॥रथस्थापनप्रयोजनमाहयावदितिकैःसहमयायोद्धव्यंमयासहवाके
र्योद्धव्यमित्युभयत्रसहशब्दसंबंधःकेवामांजेतुंयततेमयावीकेनेतव्याइत्यालोचनार्थमित्यर्थः॥२२॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः॥धार्तराष्ट्रस्यदुर्बुद्धेर्युद्धे प्रियचिकीर्षवः॥२३॥संजय उवाच॥एवमुक्तो हृषीकेशो गुडाकेशेन भारत॥सेनयोरुभयोर्मध्येस्थापयित्वारथोत्तमं॥२४॥ भीष्मद्रोणप्रमुखतः सर्वेषांचमहीक्षितां॥उवाचपार्थपश्यैतान्समवेतान्कुरूनिति॥२५॥त त्रापश्यत्स्थितान्पार्थः पितॄनथपितामहान्॥आचार्यान्मातुलान्भ्रातॄन्पुत्रान्पौत्रान्सखींस्तथा२६॥

पितामहान्भीष्मादीन्मातुलान्शल्यादीन्भ्रातॄन्दुर्योधनादीन्पुत्रान्लक्ष्मणादीन्पौत्रान्लक्ष्म णादिपुत्रान्सखीनश्वत्थामादीन्॥२६॥

सुहृदःकृतवर्मादीन्॥२७॥कृपयास्नेहेनसत्त्वस्थजनमितिविशेषणेनप्रदर्शयते॥२८॥सीदंतिनिश्चेष्ट

श्वशुरान्सुहृदश्चैवसेनयोरुभयोरपि॥तान्समीक्ष्यसकौंतेयःसर्वान्बंधूनवस्थितान्॥ २७॥कृपयापरयाविष्टोविषीदन्निदमब्रवीत्॥अर्जुनउवाच॥दृष्ट्वेमंस्वजनंकृष्णयुयुत्सुंस मुपस्थितं॥२८॥सीदंतिममगात्राणिमुखंचपरिशुष्यति॥वेपथुश्चशरीरेमेरोमहर्षश्चजा यते॥२९॥गांडीवंस्रंसतेहस्तात्त्वक्चैवपरिदह्यते॥नचशक्नोम्यवस्थातुंभ्रमतीवचमेमनः॥ ३०॥निमित्तानिचपश्यामिविपरीतानिकेशव॥नचश्रेयोनुपश्यामिहत्वास्वजनमाहवे॥३१॥

निमित्तंनिरोमहर्षोरोमांचः॥२९॥३०॥निमित्तानिलोकक्षयकराणिभूमिकंपादीनि॥३१॥श्रीरामरुद्र॥

॥३२॥३३॥श्यालाश्चेतिश्यालशब्दोदंत्यादिःविज्ञामातुश्चतवाच्यास्यालादितिमंत्रवर्णान्।स्यालाजानावपनी

नकांक्षेविजयंकृष्णनराज्यंसुखानिव॥किन्नोराज्येनगोविंदकिंभोगैर्जीवितेनव॥३२॥
येषामर्थेकांक्षितन्नोराज्यंभोगाःसुखानिव॥तइमेवस्थितायुद्धेप्राणांस्त्यक्त्वाधनानिव॥३३
आचार्याःपितरःपुत्रास्तथैवचपितामहाः॥मातुलाःश्वशुराःपौत्राःश्यालाःसंबंधिनस्तथा॥३४
एतन्नहंतुमिच्छामिघ्नतोपिमधुसूदन॥अपित्रैलोक्यराज्यस्येहेतोःकिन्नुमहीकृते॥३५॥

तिवास्यंशूर्पस्यतेरितियास्कः॥३४॥हंतुंइच्छापिममनभवतिकिमुतहंतुमित्यर्थःमहीकृतेपृथिव्य ॥१०२
र्थे॥३५॥श्रीरामकृष्णवासुदेवायनमः॥

आततायिनाअग्निदोगरदश्चैवशस्त्रपाणिर्धनापहःक्षेत्रदारहरश्चैवषडेतेआततायिनः।आतताय्यि
नमायांतंहन्यादेवाविचारयन्॥नाततायिवधेदोषोहंतुर्भवतिकश्चनेतियद्यप्येवंतथापिएतान्हत्वाअ
स्मान्पापमेवआश्रयेतआततायिवधोहिअर्थशास्त्रेविहितःनहिंस्यात्सर्वाभूतानीतिधर्मशास्त्रं॥

निहत्यधार्तराष्ट्रान्नःकाप्रीतिःस्याज्जनार्दन॥पापमेवाश्रयेदस्मान्हत्वैतानाततायिनः॥३६॥

तच्चपूर्वस्मात्प्रबलंयथोक्तंयाज्ञवल्क्येन॥स्मृत्योर्विरोधेन्यायस्तुबलवान्व्यवहारतः।अर्थशास्त्रात्तुब
लवद्धर्मशास्त्रमितिस्थितिरितिअस्मान्हत्वाएतान्आततायिनःपापमेवाश्रयेदित्यपरायोजना
तथावतएवास्मद्वधेननश्यंतुनतुवयमेतेषांवधेननंक्ष्यामइतिभावः॥३६॥श्रीरामकृष्णवासुदेव

तस्मान्नार्हावयंहंतुंधार्तराष्ट्रान्सबांधवान्॥स्वजनंहिकथंहत्वा
सुखिनस्याममाधव॥३७॥यद्यप्येतेनपश्यंतिलोभोपहतचेतसः॥
कुलक्षयंकृतंदोषंमित्रद्रोहेचपातकं॥३८॥

पिरणाद अनुआहूतानानिर्वर्त्तितद्यूतादपीतिविजितंक्षत्रियस्येतिवयुद्धादनिवृत्तिःहिंसयावृत्तिःक्षत्रियस्येष्यतत्क
थंयुद्धान्निवृत्तिमिष्यतीत्याशंक्याहकथमिति॥साहिलोभमूलिकास्मृतिःकुलक्षयदोषविधिनाबाध्य
तेयथाऔदुंबरीस्पृष्ट्वाप्रायदितिस्पर्शनविधिनाविरुद्धासतीऔदुंबरीसर्वविष्टयितव्येतिसर्वविष्टनस्मृ

कथंनज्ञेयमस्माभिःपापादस्मान्निवर्त्तितुं॥कुलक्षयकृतंदोषंप्रपश्यद्भिर्जनार्दन॥३९॥

तिर्बाध्येतेलोभमूलकत्वात्तदृतनहिविधिमात्रायत्किंचित्कर्त्तव्यंश्येनादीनामधर्मरूपाणामप्यवश्या
नुष्ठेयत्वापत्तेःतस्मात्यत्फलतोनदुष्यतितदेवविहितंधर्मरूपमनुष्ठेयंयथोक्तं।फलतोपिवयत्कर्म
नानर्थेनानुबध्येते।केवलंप्रीतिहेतुत्वात्तद्धर्मइतिकथ्यतइतिश्येनादित्यापनुबंधित्वात्तयुद्धंत्याज्यमेवेत्यर्थः॥३९॥

कुलक्षयेप्रणश्यंति कुलधर्माःसनातनाः॥धर्मेनष्टेकुलंकृत्स्न
मधर्मोऽभिभवत्युत॥४०॥अधर्माभिभवात्कृष्णप्रदुष्यंतिकुल
स्त्रियः॥स्त्रीषुदुष्टासुवार्ष्णेयजायतेवर्णसंकरः॥४१॥

ति॥४०॥दुष्टासुपुत्रार्थंवर्णांतरंउपासीनासु॥४१॥श्रीरामकृष्णवासुदेवायनमः॥सांबसदाशिव॥॥१०४॥

कथंतर्हिजामदग्न्येनरामेणक्षत्रियेषुहतेषुतत्स्त्रियःपुनःपुनर्ब्राह्मणेभ्यःपुत्रानजनयामासुरित्युपाख्यायतेकथंवाधृ
तराष्ट्रादीनांअसंकरजत्वमित्याशंक्याहपतंतीति।हिशब्दोवैदिकीप्रसिद्धिंद्योतयति।साहिनेत्रोषोऽग्रेअन्यज्ञान
मस्तीतिश्रुतिःअन्यस्माज्ज्ञातंनेत्रोषोऽपत्यंनास्तीतितदर्थः।अन्यादर्यामनसापिनमेतव्योममायंपुत्रइतियास्कव
चनाच्चयेयजामहइतिन्यायात्स्वात्।येवयंयजामहइत्यर्थकात्दृश्यमानस्यपित्रादेःसंज्ञायग्रस्तादयंममपितेवेति

संकरोनरकायैवकुलघ्नानांकुलस्यच॥पतंतिपितरोह्येषांलुप्तपिंडोदक्रियाः॥४२॥

निश्चयस्यदुःसाध्यत्वात्मंत्रश्चयोहमस्मिसमन्पजे।ब्राह्मणेर्थवादश्चनवैतद्विद्मोब्राह्मणास्मोवयमब्राह्मण
वेति।तस्माद्दीजपतेरेवपिंडादिप्राप्तिर्नतुक्षेत्रपतेरितिलुप्तपिंडोदक्रियात्वादवश्यंपितॄणांपातोभवति क्षेत्रजपु
त्रस्मृतिस्तुरूढलोकेवंशस्थापनमात्रपरानतुतनक्षेत्रपतेःकश्चिदामुष्मिकउपकारोस्तिउदाहृतश्रुतिविरोधात्
अयंवसंकरोऽस्माभिःस्वयंकृतश्चेदवश्यमस्मान्बाधितव्यतएवेतिभावः॥४२॥ श्रीरामकृष्णवासुदेवायनमः॥

एतदेवविवृणोतिद्वाभ्यांदोषैरिति॥४३॥४४॥४५॥संख्येसंग्रामे॥४७॥इतिश्रीमत्पदवाक्यप्रमाणमर्यादाधु

दोषैरेतैःकुलघ्नानांवर्णसंकरकारकैः॥उत्साद्यंतेजातिधर्माःकुलधर्माश्चशाश्वताः॥४३॥
उत्सन्नकुलधर्माणांमनुष्याणांजनार्दन॥नरकेनियतंवासोभवतीत्यनुशुश्रुमः॥४४॥अहो
बतमहत्पापंकर्तुंव्यवसितावयं॥यद्राज्यसुखलोभेनहंतुंस्वजनमुद्यताः॥४५॥यदिमाम
प्रतीकारमशस्त्रंशस्त्रपाणयः॥धार्तराष्ट्रारणेहन्युस्तन्मेक्षेमतरंभवेत्॥४६॥संजयउवा
च॥एवमुक्त्वार्जुनःसंख्येरथोपस्थउपाविशत्॥विसृज्यसशरंचापंशोकसंविग्नमानसः॥४७
इतिश्रीमद्भगवद्गीतासु० प्रथमोध्यायः॥

॥१०५

रंधरनीलकंठस्यकृतौभारतभावदीपेभीष्मपर्वणिभगवद्गीतासुअर्जुनविषादोनाम॥चतुर्विंशोध्यायः॥४

अर्जुनयुद्धादुपरतेमत्पुत्रानिष्कंटकंराज्यंप्राप्स्यंतीत्याशावंतंराजानंप्रतिसंजयउवाचतंतथेति।तमर्जुनंत
थास्वजनंहिकथंहत्वासुखिनःस्यामाधवेत्युक्तंकारुण्यकृपयास्नेहेननुदयायापरदुःखप्रहाणेच्छा
पयातस्यापरदौर्बल्यनिश्चयोत्तरभाविन्याःअर्जुनेयदिवानोजयेयुरितिस्वपराजयमाशंकमानोदुर्भणत्ता

संजयउवाच॥तंतथाकृपयाविष्टमश्रुपूर्णाकुलेक्षणं॥विषीदंतमिदंवाक्यमुवाचमधुसूदनः॥१॥

त्वयानिवहत्वानजिजीविषामइतिस्नेहातिशयसूचकवाक्येशोषविरोधाच्च।आविष्टंव्याप्तं।विषीदंतंसी
दंतिममगात्राणीत्यादिनाउक्तरूपंविषादंप्राप्नुवंतं।इदंवक्ष्यमाणंवाक्यंवचनीयंउवाचमधुसूदनइतिदुष्टहं
तृत्वंतदेवार्जुनंनिमित्तीकृत्यतत्पुत्रानपिहनिष्यत्येवेतित्वयाजयाशानकार्यतिभावः॥१॥श्रीरामकृष्ण॥

GOVERNMENT OF SIKKIM
DARJEELING

अर्जुनंउद्योजयन्श्रीभगवानुवाच॥कुतइति।कश्मलंवैक्लव्यंविषमयुद्धसंकटेअनार्यैर्भीरुभिर्जुष्टंसेवितं
नतुलाघवोःशूरैःनआर्यैर्जुष्टमितिवा यन्वार्यैरजुष्टमितिविग्रहादृश्रितःतत्अर्थैक्येपिपरव्युत्क्रमदा
षादुपक्ष्यं अतएवास्वर्ग्यमकीर्त्तिकरंवाहेअर्जुनस्वच्छस्वभावतवनैतद्युक्तमितिभावः॥२॥तदेवाहक्लै

श्रीभगवानुवाच॥कुतस्त्वाकश्मलमिदंविषमेसमुपस्थितं॥अनार्यजुष्टमस्वर्ग्यमकीर्तिकरम
र्जुन॥२॥क्लैव्यंमास्मगमःपार्थनैतत्त्वयुपपद्यते॥क्षुद्रंहृदयदौर्बल्यंत्यक्त्वोत्तिष्ठपरंतप॥३॥

व्यमितिक्लैव्यंनिर्वीर्यतंनवशक्रोम्यवस्थातुमित्युक्तरूपंमागाःनैतत्त्वयिमहादेवप्रतिभटेयुक्तंअतःक्षुद्रं
उच्छंहृदयकृतमेवतवदौर्बल्यंनतुशक्तिसहायाद्यभावकृतंनत्यक्त्वाउत्तिष्ठयुद्धायपरंतपशत्रुतापनं॥३॥

ननुशत्रवोवास्वभावदुष्टावातापनीयाःनतुबांधवाःसाधवश्चेत्यर्जुनउवाच।कथमिति।मधुसूद
नारिसूदनेतिसंबोधयन्तवापिदुष्टानदुष्टापिशत्रूनेवतापयतःपूज्यार्हौअदुष्टोगुरूत्वभीष्म

अर्जुनउवाच॥कथंभीष्ममहंसंख्येद्रोणंचमधुसूदन॥
इषुभिःप्रतियोत्स्यामिपूजार्हावरिसूदन॥४॥

द्रोणोजहीतिवक्तुमयुक्तमितिसूचयति।समानार्थकमिदंसंबोधनद्वयंवक्तुःशोकेनविक्लवत्वान्
नपौनरुक्त्यदोषावहमित्यन्येइषुभिरितिताभ्यांसहवावापियोद्धुमशक्यंकिमुतबाणैरितिभावः॥४॥

ननुयुध्योद्यतानांगुरूणामपिपक्षेश्रेयानित्याशंक्याहगुरूनिति।यद्यपिनदुष्टंप्रत्युत्तमेवतथापिमहानु
भावान्गुरून्अहत्वाभैक्ष्यमेवभोक्तुंश्रेयःप्रत्युत्तरं एवंतर्हिगुरूंस्यकादुर्योधनादीनेवदुष्टान्जहीत्याशं
क्याहअर्थकामानिति॥धनार्थिनोगुरवोवध्यंदुर्योधनमाहाय्यंकरिष्यंतितेनतद्दोषोपिप्रसक्तएवेत्यर्थः नु

गुरूनहत्वाहिमहानुभावान्श्रेयोभोक्तुंभैक्ष्यमपीहलोके॥हत्वार्थकामांस्तुगुरूनिहैव भुञ्जी
यभोगान्रुधिरप्रदिग्धान्॥५॥

शङ्कःपक्षांतरोपन्यासार्थःइहैवनतुपरलोकेभुंजीयेतिसंप्रश्नेलिङ्गुरून्अहत्वाभैक्ष्यंश्रेयःउतहत्वा
भोगसंपादनंश्रेयइतिसंप्रश्नस्वयमेवांत्यपक्षदूषणमाहरुधिरप्रदिग्धानिति॥५॥श्रीरामकृष्णहरि॥ ॥१०७॥

एवंतर्हिभैक्ष्यमेवतवश्रेयइत्याशंक्याहनचैतदिति॥यद्यपिक्षत्रियस्यभैक्ष्यमेवेष्टंतथापिनःअस्माकं
क्षत्रियाणांभैक्ष्यभोगयोर्मध्येकतरत्गरीयइतिवयंन्नविद्मःननूक्तंयुद्धमेवगरीयइतितत्राहयदीति॥

नचैतद्विद्मःकतरन्नोगरीयोयद्वाजयेमयदिवानोजयेयुः॥
यानेवहत्वान्नजिजीविषामस्तेवस्थिताःप्रमुखेधार्तराष्ट्राः॥६

यदिवावयंजयेमन्नात्मनोयदिवानोऽस्मान्नात्मवएवजयेयुःइदमपिनविद्मःअंत्यपक्षेपुनर्मरणमत्रा
र्थितंभैक्ष्यमेववापद्यतइतिभावःननुमयिसहायेसतितवजयएवनिश्चितइत्यतआहयानेवेति॥

इष्टनाशाज्ञयोपिपराजयरूपएवेत्यर्थःयत्तुनिश्चितंपिभैक्ष्यश्रेयस्त्वंपुनर्युद्धंभैक्ष्ययोःकतरत्श्रेय इतिसंन्यायेनोचितःअतोनःअस्माकंमध्येकतरत्सैन्यंगरीयइतिव्याख्येयमितिसदसत्।धर्मसं मूढचेताइतिवाक्यदोषादुक्तसंन्यायस्यैवोचितत्वात्।सैन्यगरीयस्त्वसंन्यायेनैवजयसंन्यायेऽन्यति थोद्दःऽन्यतरसंन्यायवैयर्थात्।विशेष्याध्यूहाहरदोषाच्च॥६॥ श्रीरामकृष्णवासुदेवायनमः॥

॥१०८॥

उक्तसंन्यायमनेवपृच्छतिकार्पण्येतिकार्पण्यंदीनत्वं।स्वभावःशौर्यतेजोधृतिर्दाक्ष्यमित्यादिनावक्ष्यमाणलक्षणः शोषंस्पष्टं॥७॥ननुक्षुद्रहृदयदौर्बल्यंत्यक्त्वातिष्ठपरंतपेतियुद्धमेवश्रेयइत्युक्तंकिंपुनःपृच्छसीत्यतआहनहीति।बंधुनाद्रोणादिनिमित्तःशोकोराज्यलाभेनस्वर्गाधिपत्यलाभेनवाननिवर्तेदृष्यतइतियुद्धादन्यंकंचित्तंनिवर्त्ति

कार्पण्यदोषोपहतःस्वभावःपृच्छामित्वांधर्मसंमूढचेताः।यच्छ्रेयःस्यान्निश्चितंब्रूहितन्मेशिष्यस्तेहंशाधिमांत्वांप्रपन्नम्॥७॥नहिप्रपश्यामिममापनुद्याद्यच्छोकमुच्छोषणमिंद्रियाणां।अवाप्यभूमावसपत्नमृद्धंराज्यंसुराणामपिचाधिपत्यं॥८॥

रूपंन्यायोपायंब्रूहीत्याशयःअत्रार्जुनविषादयोजनब्रह्मविद्याधिकारिविशेषणंभैक्ष्यचर्याइहामुत्रार्थफलभोगविरागश्चदर्शितः॥८॥ श्रीरामकृष्णवासुदेवायनमः॥ सांवशिव॥

॥९॥तमितिमूढोप्ययममूढ वदृतीतिप्रहसन्निवइदंवक्ष्यमाणं॥१०॥ श्रीरामकृष्णवासुदेव॥

संजयउवाच॥एवमुक्काहृषीकेशंगुडाकेशःपरंतप॥नयोत्स्यइतिगोविंद
मुक्कातूष्णींबभूवह॥९॥तमुवाचहृषीकेशःप्रहसन्निवभारत॥सेनयोरु
भयोर्मध्येविषीदंतमिदंवचः॥१०॥

श्रीरामजयरामजयजयराम॥श्रीरामकृष्णवासुदेवायनमः॥सांबसदाशिवायनमः॥श्रीकृष्ण॥ ॥१०९॥

अर्जुनस्यदेहनाशआत्मनाशधीःस्वधर्मेयुद्धेवाधर्मधीरितिमोहदूयंतत्राद्यंब्रह्मविद्यासूत्रभूते
र्विज्ञायाश्लोकेरपुनिनीषन्श्रीभगवानुवाच॥अशोच्यानन्वशोचस्त्वमितिजीवोपेतंवावैकिलेदंमि
येतनजीवोम्रियतइतिश्रुतेःदेहाद्युपाधिनाशेप्याकाशवन्नाशरहितत्वेनअशोचनीयानभीष्मादी

श्रीभगवानुवाच॥अशोच्यानन्वशोचस्त्वंप्रज्ञावादांश्चभाषसे॥गतासूनगतासूंश्चनानुशोचंति पंडिताः॥११॥

नन्वशोचःकथमेनंसुरवोमयाहंतव्याःकथंवातेर्विनाऽहंजीविष्यामीतिशोकंकृतवानसि॥एवंमूढोपि
त्वंप्रज्ञावादान्प्रज्ञावतांदेहादन्यमात्मानंजानतांवादान्शास्त्रान्नरकेनियतंवासःपतंतिपितरोह्य
षामित्यादीन्भाषसेपरंननुप्रज्ञावानसितत्रहेतुःगतासूनितिगतासून्गतप्राणान्देहान्नानु

शोचंतिप्रत्युतनिर्हरंत्येवएतेनप्राणइवइष्टानुदेहः तथाचश्रुतिः प्राणोहपितापाणोमाताप्राणआचार्यइत्यादिःअतएवसप्राणेनेतान्अवगणयंतंनरंपित्रादिहंतात्वमसिधिक्कामितिवदंतिउत्क्रांतप्राणान्देहंतमपिनैवंवदंतीतिलोकवदप्रसिद्धिःतस्मात्आत्मादेहादन्यःचेतनत्वात्व्यतिरेकेणघटवत्देहोनचेतनःदृश्यत्वात्घटवत्। यदिदेहश्चेतनःस्यात्मृतेपित्रचैतन्यमुपलभ्येत।तस्मादेहनाशेनात्मनाशंमन्यानोमूर्खएवासीत्यर्थः यद्यप्रज्ञानांपंडितानांअवादान्वकुमयोग्यात्प्रायसइतितार्किकव्याख्यानंतत्अर्हार्थेयज्ञोदुर्लभत्वात्विशेष्याध्याहारःसापेक्षत्वाच्चोपेक्ष्यं॥११

श्रीरामकृष्णवासुदेवायनमः॥

॥११०

ननुदेहादन्योपिदेहनाशेननश्यतांकोशाकारइवकोज्ञानाशेनेतित्राहनत्वेवाहइति।त्वमहमिमेचसर्वेजनादयोऽनेतावत्स्मइत्यर्थःजातुकदाचित्अहंनआसंइतिनअपितुआसमेव।तथात्वमपिनासीरितिनअपितासीरेवाइमेजनाधिपाःराजानइत्युपलक्षणंसर्वस्यजंतुजातस्यनासन्नितिनअपितासन्नेवेतियोजना।

नत्वेवाहंजातुनासंनत्वंनेमेजनाधिपाः॥नचैवनभविष्यामःसर्वेवयमतःपरं॥१२॥

अनादिलाअनंताश्चेत्याहनचेति।नभविष्यामइतिनैवकिंतुसर्वेभविष्यामएव।ननुदेहस्यानात्मत्वेकथंतत्तीइयायंपीड्यतइतिचेत्यक्षवत्तदभिमानमात्रादितिब्रूमःयदाहियक्षःपरशरीरंविशतितदातत्तीइयादेहपतिर्नबाध्यतेतस्यतदानींदेहाभिमानाभावात्यक्षस्तुबाध्यतेऽभिमानसत्वादितिलोकेप्रसिद्धं।किंत

प्राक्तनकर्मव्यतिरेकेणजीवनंनोपपद्यतेरुनहानारुताभ्यागमप्रसंगात्। वृक्षादिष्वपिप्राक्कर्मास्तीत्यनुमेयंस्थावरजीविकाप्राक्कर्मपूर्विकाजीविकात्वात्पाकादिक्रियापूर्वकास्मदादिजीविकावत्अपिचक्रियावैचित्र्यात्कार्यवैचित्र्यंदृष्टंघटशरावोदंचनादिषुनदृहिहापिसुखदुःखादिवैचित्र्यंप्राक्कर्मवैचित्र्यादनुमेयं॥तथामद्योजातस्यगोवत्सस्यस्तनपानादौप्रवृत्तिःजंतुमात्रस्यमरणात्रासश्चप्राग्भवीयानुभवजनितसंस्कारजन्योभोजनादिप्रवृत्तिवोरत्नासादिवदित्यतोस्तिप्राक्तनंकर्म।अपिचकौलिकशास्त्रप्रसिद्धमेतत्यथामेवदत्तःस्वशरीरेकंटकवेधेनविद्धयतेएवंशत्रुकृतायांदेवदत्तप्रतिमायांकंटकेनविद्धायांदेवदत्तोव्यथते।तत्रव्यथाहेतुर्नांतरधातुवैषम्यंनापिबाह्यकंटकवेधादिकिंतुकेवलंप्राक्कर्ममात्रं।एवंबीजांकुरन्यायेनकर्मतज्ज्ञान्यसंस्कारपरंपरयाऽनादिःसंसारइतिनदेहनाशादात्मनाशोस्तीतिनभीष्मादयःशोच्याःअत्रपूर्वस्मिन्श्लोकेआत्मनोदेहादन्यत्वमुक्तं।गतासूंदेहानितिविशेषणेनअत्रतुसूक्ष्मशरीरविशिष्टस्यात्मनोव्यवहारदृष्ट्यानित्यत्वंसा

॥१११॥

यद्यप्येवंतथापीष्टदेहवियोगजःशोकोभवत्येवेत्याशंक्याहदेहिनइति देहोस्थूलसूक्ष्मोविद्यतेअन्यदेहीविदात्मातस्ययथास्मिन्स्थूलशरीरेकौमारादयवस्थासुदेहभेदेपिएकएवाहंबालआसमिदानींवृद्धोस्मीत्यभेदप्रत्यभिज्ञानादैक्यं।बालादिशरीरेभ्योन्यत्वंव्यावृत्तेभ्योनुवृत्तंभिन्नंकुसुमेभ्यःसूत्रमिवेतिन्यायात्॥

देहिनोस्मिन्यथादेहेकौमारंयौवनंजरा॥तथादेहांतरप्राप्तिर्धीरस्तत्रनमुह्यति॥१३॥

एवंदेहांतरप्राप्तिरपिस्थूलशरीरादन्येषांलिंगशरीराणांसूक्ष्माणांस्थूलशरीरानुकारिणांप्राप्तिःअयमर्थःयथाएकमपिस्थूलंशरीरंकौमारादयवस्थाभेदानदनेकरूपंएवंनित्यमपिलिंगशरीरंप्राणिकर्मभेदान्नसुरनरतिर्यगाद्यवस्थाभेदादनेकंभवतितत्रोक्तन्यायेनस्थूलादिवसूक्ष्मादपिशरीरादात्मा विविक्तएव॥

एवंवशोकादिधर्मिणोलिंगादपिविभिन्नस्यतवइष्टवियोगजःशोकोपिनयुक्तःअतएवतत्रतस्मिन्विषयेधी
रोनमुह्यति।आभिमानिकोशोकमोहोदेहद्वयाभिमानत्यागान्धीरंनबाधेते अतस्त्वमपिधीरोभवे
तिभावःपूर्वश्लोकयोर्गतासूनितिवयमितिचबहुवचनंउपाधिभेदाभिप्रायंअत्रतुदेहिनइत्येकवचनंउ
पधेयविदात्मैक्याभिप्रायमितिज्ञेयं।तथाचश्रुतिरेकस्यात्मनऔपाधिकंभेदमाहयथाह्ययंज्योति
रात्माविवस्वानयोभिन्नाबहुधैकोनुगच्छन्उपाधिनाक्रियतेभेदरूपोदेवःक्षेत्रेष्वेवमजोयमात्मेति।
क्षेत्रेषुवक्ष्यमाणलक्षणेषुस्थूलसूक्ष्मदेहद्वयात्मकेषु।एकोदेवःसर्वभूतेषुगूढःसर्वव्यापीसर्वभूतांत
रात्मेतिचा।एकताचविभुत्वमप्यस्यसिद्धं।तेनदेहादीनामनित्यानामविभूनांचपराभिमतमात्मत्वंप्रत्याख्या
तंवेदितव्यं॥१३॥श्रीराम॥ ॥११२॥

ननुआत्मनोलिंगशरीरादन्यत्वेपिअहंदुःखीत्याद्यनुभवात्दुःखादिधर्माश्रयत्वंदुर्वारंततश्चभीष्मादिबंधुव
र्गनाशेसतिदुःखसंबंधोभवत्येवेत्याशंक्याहमात्रास्पर्शास्तिमीयंतेविषयाआभिस्ताःमात्राइंद्रियवृत्तयःयद्वा
दृश्यप्रज्ञामात्राःवागादयःदृश्यभूतमात्राःनामादयःकैश्चीतकिंप्रसिद्धाइंद्रियविषयरूपाःग्राह्याःतासांस्पर्शा

मात्रास्पर्शास्तुकौंतेयशीतोष्णसुखदुःखदाः।आगमापायिनोनित्यास्तांस्तितिक्षस्वभारत॥१४

परस्परंविषयविषयिभावेनसंबंधस्तित्याख्येयं।यद्वामात्राप्रमात्रासहस्पर्शाःविषयेंद्रियसंबंधाःस्पर्श
शब्दस्यतद्वाचितंस्पर्शान्कृतावहिर्वर्त्यानित्यत्रदृष्टं तत्रस्पर्शपदेनतद्वतोःविषयेंद्रिययोरपिलाभःतेन
प्रमातुःप्रमाणद्वाराप्रमेयेनसहसंबंधाःसर्वेशीतोष्णादिवदागमापायिनःउत्पत्तिविनाशशीलाअतएवा

नित्याश्चतद्देवसुखदुःखदाश्चअतस्तान्तितिक्षस्वसहस्वेहकौंतेयमात्रास्पर्शास्त्वनमवंत्र्यत्वेनधीरत्वमस्यसू
चयति।प्रमात्तत्वादिरनर्थोहिसुप्तिसमाधिग्रहेवज्ञादिष्वभावाज्जाग्रत्स्वप्नदोषाभावाच्चकादाचित्कतयाआत्म
निप्रतीयमानोपिरज्जूरगादिवन्मिथ्याभूतःसन्नतद्धर्मतंभजतेयद्धियत्राभेदेनकदाचिज्ज्ञातिकदाचिन्नतत्रा
ध्यस्तंरज्वामिवसर्पःप्रमात्रादिश्चप्रतीचित्सत्यगभेदेनकदाचिज्ज्ञातिअतोमिथ्येतिनिश्चितंतेनप्रतीचिप्रमा
तृसंबंधएवनास्तिसत्यमिथ्यावस्तुनोर्वास्तवसंबंधायोगात्प्रमात्धर्माणंदुःखादीनांतुप्रतीचिसंबंधोदूरापे
तएवकथंतस्यात्मनिदुःखिलप्रत्ययःतत्तदुपाधितादात्म्याध्यासादितिब्रूमःअतएवजाग्रतिदृष्टंदुःखंस्वप्ना
नुवर्त्ततेसप्रदृष्टंवाजाग्रतिनदृश्यते।तथाचश्रुतिःसयत्तत्रपश्यतिपुण्यंवापापंवानन्वागतस्तेनभवत्यसंगोह्य ११३॥
यंपुरुषइति।कामःसंकल्पोविचिकित्सेत्यादिश्रुतिरेतत्सर्वंमनएवेतिअभेदनिर्देशात्कामादिसर्वविकारापा
दानतंमनसएवाहातस्मात्स्वप्नइवात्मनिदुःखिलप्रतीतिर्भ्रांतिरेवेतिइष्टवियोगजनितांतांतितिक्षस्वेतिभावः॥१४॥

तितिक्षाफलंप्रत्यक्षमेवेत्याहयंहीति।एतेमात्रास्पर्शाःप्राक्व्याख्यातरीत्यात्रिविधाअपियंजाग्रतिस्वप्नंसंप्रज्ञात
समाधौवानव्यथयंतिस्वात्मन्यप्रत्यावयंतिपुरुषंपूर्वअष्टासुवसतीतिपुरुषस्त्वं।पुरश्चकर्मेंद्रियाणिखलुपं
चतथापराणिज्ञानेंद्रियाणिमनआदिचतुष्टयंवाप्राणादिपंचकमथोवियदादिकंचकामश्चकर्मचतमःपुन
रष्टमीपूरितिप्रसिद्धाःयद्वास्थूलसूक्ष्मोपाधिमध्येएवइतरासांअंतर्भावात्।अत्रपूरितिनमएवग्राह्यतेन

यंहिनंव्यथयंत्येतेपुरुषंपुरुषर्षभ।।समदुःखसुखंधीरंसोमृतत्वायकल्पते॥१५॥

कारणोपाधेरपिआत्मनोविविक्तत्वंदर्शितंपुरुषर्षभेतित्वमप्येतदनुभवितुंयोग्योसिसर्वपुरुषश्रेष्ठ
त्वादितिसूचयतिउपाधित्रयत्यागादेवममदुःखसुखंक्षयस्यतं।नहिसमाधिस्थस्यसुखायदुःखायवा
ज्ञीतोष्णस्पर्शौभवतइतियुक्तमस्यसमदुःखसुखंधीरंध्यायिनंयोगिनंनव्यथयंतिसोमृतत्वायमो
क्षायकल्पतेयोग्योभवति।।१५॥श्रीराम॥

ननुसुप्तिसमाध्यादौत्यक्तोपाधेरात्मनःसमदुःखसुखत्वेतिसोपाधिकदृष्टायांतप्तायःपिंडस्यदग्धृत्वमि
वतस्यदुःखित्वंदुर्वारंउपाधिश्चमूलप्रकृतेर्व्यापिकायामात्मरूपइतितत्सत्वेसतिननिर्मूलोच्छेदमर्हत्य
तःसोम्रतत्वायकल्पतइत्यनुपपन्नमित्याशंक्याहनासतइतिप्रमात्रेदेरागमायायिलक्षणकादाचित्क

नासतोविद्यतेभावोनाभावोविद्यतेसतः॥उभयोरपिदृष्टोंतस्त्वनयोस्तत्वदर्शिभिः॥१६॥

त्वातूरज्जूरागादिवत्असतःभावःसत्ताकालत्रयेपिनास्तिअयमर्थःप्रमात्रादिर्मूलाज्ञानेनविदात्मनि
कल्पितःमूलज्ञानस्यचात्मज्ञानेननिवृत्तौकारणाभावान्नपुनःप्रमात्राद्युद्भवोस्तीतिनिष्प्रत्यूहममृत ॥११५॥
त्वज्ञानात्सिध्यतीतिनन्वप्रतीतिमात्रात्प्रमात्रादेर्मिथ्यात्वोपगमेआत्मनापिसुप्त्यादावप्रतीयमानत्वा

विशेषान्मिथ्यात्वमस्तुउभयोर्वासत्यत्वमस्तुइत्याशंक्याहनाभावोविद्यतेसतइति।सद्वस्तुनःअभावोसत्वं
कदाचिदपिनविद्यतेसुषुप्त्यादावपिअनुभूतयोःसुखाज्ञानयोःसुखमहमस्वाप्समंनकिंचिदवेदिषमिति
उत्थानेपरामर्शदर्शनात्सदनुभवमंतरेणतयोःपरामर्शाशंभवात्।अतःसतोऽसत्वंनास्ति।श्रुतिरपि
सुप्तिकैवल्ययोर्मात्राद्यभावंदर्शयंनित्यत्वंवाहयदैतन्नपश्यतिपश्यन्वैतन्नपश्यतिनहिद्रष्टुर्दृष्टेर्विप
रिलोपोविद्यतेऽविनाशित्वान्नतुतद्द्वितीयमस्तितताेन्यद्विभक्तंयत्पश्येदिति।यदिमात्रादिःसत्यस्त
र्हिसतोर्थस्यसुप्त्यादावदर्शनंसान्निध्याभावाद्वाद्रष्टुर्दृग्लोपाद्वावक्तव्यंनाद्यःआत्मनिदृष्टनष्टस्वभा
वस्यान्यत्रसद्भावकल्पनाऽयोगात्।नांत्यःउदाहृतयाश्रुत्यैवतन्निषेधात्।तस्मात्उभयोरपिसत्यत्वेन

वासाम्यंदुर्वचंननुसतआकाशादेःक्वचिदपिदेशेकालेवाभावोयद्यपिनास्तिनथापिसतएवपरमाणोर्दे
शांतरेऽभावोनास्तिप्रागसतोपिघटादेर्भावश्चदृष्टःतत्कथमुच्यतेनासतोविद्यतेभावोनाभावोविद्यतेसत
इत्यादेःकथंविद्वदनुभवेननिरस्यतिउभयोरपीति।अंतोयाथात्म्यंयथास्वप्नेनभःकुंभरज्जुरज्जूरगाद
योनित्यत्वानित्यात्मसत्यत्वादिधर्मोपततयानिश्चिताअपिप्रबोधेबाध्यंतेतद्वज्जाग्रद्दृष्टाअपिते
तत्त्वज्ञानेनबाध्यते। ननुजाग्रद्दासनावशात्स्वाप्ननभआदौनित्यत्वादिनिश्चयोभ्रमइतिचेत्अना
दिकालप्रवृत्तप्राग्भवीयसंस्कारवशात्जाग्रन्नभआदावपिसभ्रमएवेतितुल्यं।ननुस्वरूपसदेव
रजतादिकंशुक्त्यादावध्यस्यतेनत्वसत्शशशृंगादिकं।गगनादिकंतुतद्वीत्यास्वरूपेणअसदपिक
थमात्मन्यध्यस्यतइतिचेत्नअध्यासेहिपूर्वानुभवमात्रमपेक्ष्यतेनत्वनुभूतस्यस्वरूपेणसत्वमपि

दर्पणप्रतिबिंबितेगगनेपिनैत्याध्यासदर्शनात्तत्रवगगनेनैत्यंस्वरूपेणसत्यमस्तिअथवान्यत्राध्य
स्यतेतस्मात्त्रामपरंपरायाःसंभवात्स्वप्नदृष्टगिरिवास्माभिरदृष्टमपिसदसतोर्याथात्म्यंप्रबुधे
दृष्टुंशक्यमेवातथावश्रुतयःनेहनानास्तिकिंचनअस्तीत्येवोपलब्धव्यःअतोन्यदार्तमित्याद्याःअना
त्मनोऽसत्वंआत्मनश्चसत्वंप्रतिपादयंतिएवंसतोज्ञानेनासतोबाधात्कैवल्यंसिध्यतीतिभावः॥१६॥
श्रीरामकृष्णवासुदेवायनमः॥

यस्यभावोनास्तितस्यतेसेसत्वेकिंमानमित्याशंक्याह।अविनाशीति।तच्छब्देनप्रकृतंसत्परामृश्यते॥
येनसताइदंसर्वंवियदादितत्व्याप्तंघटासत्पटःसन्नितिसर्वस्यसदभेदानुभावात्यथाघटामृत्ता
रावामृदितिघटादीनांमृदभेदानुभवान्मृदुपादानकत्वंतद्वत्सर्वस्यापिसदुपादानकत्वंबोध्यंननुम

अविनाशितुतद्विद्धियेनसर्वमिदंततं॥विनाशमव्ययस्यास्यनकश्चित्कर्तुमर्हति॥१७॥

द्वत्सदपिकिंविकारवद्भवतीत्याशंक्याहअविनाशीतितत्सत्अविनाशिविद्धि अयमर्थःपूर्वावस्था
परित्यागेत्रविनाशःस्द्विपिंडाकारतांत्यक्त्वाघटीभवतिअतःसाविनाशीलाविकारधाराश्रयत्वा
त्नब्रह्मतुनतथाकिंतर्हिरज्जूवत्स्वयमविनश्यदेवकार्याकारंभवतिस्वकीयेनसत्तास्फुरणेकार्यंपश्यति॥

अतोऽविनाशि तथाचश्रुतयःअजायमानोबहुधाविजायते।जातएवनजायतेकोन्वेनंजनयेत्पुनःअ
जायमानःजन्माख्यंविकारमलभमानोपिजायतेवियदादिरूपेणविभवति।तथालोकदृष्याजा
तोघटादिःपरमार्थदृष्यानजायतेपरिणाम्युपादानस्याभावात्मृदोदेस्तुस्वाप्नमृदादिवतुल्यत्वा
त्।अतएवघटादिकोनुजनयेन्नकोपिकुतस्तर्हिभासतइतिचेत्रज्जूरगादिवदितिदृष्टान्तरमेतत्।
तथाप्राणावैसत्यंतेषामेषसत्यंतस्यभासासर्वमिदंविभातीति।मतःसत्यत्वेनप्राणोपलक्षित
स्यप्रपंचस्यसत्यत्वंसतोभानेमवप्रपंचस्यभानमितितथाचप्रपंचगतेसत्तास्फूर्तिसतःसत्वप्रमाण
मित्यर्थःश्रुतिश्चअन्नेनसोम्यशुंगेनापोमूलमन्विच्छअद्भिःसोम्यशुंगेनतेजोमूलमन्विच्छतेज

सासोमशुंगेनसन्मूलमन्विच्छसन्मूलाःसोम्यमाःप्रजाःसदायतनाःसत्प्रतिष्ठाइतिसतोजगदुपादान
त्वंकार्यलिंगेनद्दश्यति।सतोविनाशित्वं त्वविनाशेहेत्वभावादित्याहविनाशमिति।नव्यतिनापक्षी
यतइत्यव्ययंएतेनसर्वविकारशून्यस्यविनाशोनास्तीत्यर्थःअपक्षयोहिजन्मादिविकारवत्एव
भवतीतिसएवात्रसर्वविकारोपलक्षणतयाबोध्यःनकश्चिदित्यनेनतदन्यस्यविनाशहेतोरभा
वोदर्शितःद्वितीयोद्वैभयंभवतीतिश्रुतेः॥१७॥श्रीरामकृष्णवासुदेवायनमः॥

॥११७॥

एवंसतआत्मनोनित्यत्वंअसतोदेहादेरनित्यत्वंचोक्तमुपसंहरन्एवंयुद्धाभिमुखंकरोति।अंतवंत
इतियद्यपिनासतोविद्यतेभावइतिअसतांदेहानांकालत्रयेपिसत्वंनास्तीतिपरमार्थदृष्ट्याउक्तंतथा
मान पितांदृष्टिमप्रतिपाद्यस्यनरकादिभयमनुद्यमानस्यव्यवहाराभिप्रायेणनित्यानित्यविभागम

अंतवंतइमेदेहानित्यस्योक्ताःशरीरिणः॥अनाशिनोप्रमेयस्यतस्माद्युद्ध्यस्वभारत॥१८

भिप्रेत्यदेहानामंतवत्वमुच्यतइतिनदोषःनित्यत्वंकालापरिच्छेद्यत्वंतच्चव्यवहारेनभसोप्यस्तीत्य
तउक्तंअनाशिनइति।नाशोअदर्शनंतद्धानंहिआकाशःनभआत्मनिलीयतइतिस्मृतेः।अयंतुन
तथेत्यनाशीसर्वदैवप्रकाशोनरइत्यर्थःएतदपिनघटादिवदृश्यत्वेनेत्याहअप्रमेयस्येति।तथाच
नघटादिदृश्यपरिमाणवत्

बलप्रमाणंसर्वस्यास्तिब्रह्मणः बोधकप्रमाणंविनापिनाऽप्रसिद्ध्याभावात् स्वतःप्रमाणत्वात्

श्रुतिरात्मनःअप्रमेयत्वमाह।एतदप्रमेयंध्रुवमिति।अप्रमेयमित्यस्याप्रमेयमित्यर्थः एतच्चात्म
(अबोधनात्)
निप्रमाणाप्रमेरनेनेत्थंतथात्वश्रुतिःयेनेदंसर्वविजानातितंकेनविजानीयाद्विज्ञातारमरेकेनविजा
नीयादिति।प्रसिद्धस्त्वस्यप्रत्यगात्मात्वदेवयत्साक्षादपरोक्षाद्ब्रह्मयआत्मासर्वांतरइतिश्रुतेःउक्तं
च॥प्रमाणमप्रमाणंवप्रमाणमस्तथैवच॥यस्मादात्मसिध्यंतितदसंभावनाकुतइतिनस्माद्युद्ध
स्वभारतभीष्मादिदेहानांमिथ्यात्वादनित्यत्वाच्चस्वयमेवनष्टप्रायतयाहननान्निवृत्यात्वयास्व
धर्मोनाम्नानीयइतिभावः॥१८॥ श्रीरामकृष्णवासुदेवार्पणमस्तु॥

॥११८॥

ननुनासतोविद्यतेभावइतिन्यायेनाऽसतोमात्रादेर्मिथ्यात्वेननिःस्वरूपत्वात्कर्तृत्वंनसंभवति।अतःसत
एवकर्तृत्वंबंधमोक्षभाक्त्वंवाच्यंअन्यथांऽतःकरणेबंधआत्मनश्चमोक्षइतिनयोर्वैयधिकरण्यंस्या
तूतथायेनसर्वमिदंततमितिसतोदेहाद्युपादानत्वंवोक्तंतथावहननक्रियांप्रत्येकस्यैवकर्तृत्वंकर्मत्वं

यएनंवेत्तिहंतारंयश्चैनंमन्यतेहतं।उभौतौनविजानीतोनायंहंतिनहन्यते॥१९॥

व्यापतितच्चविरुद्धंस्वात्मनिव्यापारायोगात्नहिवह्निर्वह्निंदहतीतियुक्तमित्याशंक्याहएनमिति
यश्चतार्किकादिरेनमात्मानंहंतारंहननक्रियायाःकर्त्तारंमन्यतेयश्चचार्वाकादिरेनंहतंहननक्रिया
यःकर्मभूतंमन्यतेतावुभावपिनजानीतआत्मतत्वमितिन्नोषः यस्मात्नायंहंतिनहन्यतेनहियः

कर्तासआत्मानपिदेहआत्मानयोःप्रागेवानात्मत्वावधारणात्।अयंभावःयथाऽयःपिंडेवह्निसंबंधा
देवद्गृह्यत्वंनतुस्वतःएवंमात्रायुदयसमनियतंकर्तृत्वंमात्रादिधर्मएवनात्मनःआत्मनितुकर्तृत्वप्रती
तिर्मात्रादिसंबंधादेवअतोमात्रादिविशिष्टस्यैवबंधोनकेवलस्य।मोक्षश्चमात्रादिवियोगएवेतिन
बंधमोक्षयोर्व्यधिकरण्यंनवमात्रादेर्निःस्वरूपत्वमस्तिसत्वासत्वाभ्यामनिर्वचनीयस्यव्यवहा
रयोग्यस्यब्रह्मज्ञानेकवाध्यस्यस्वप्नमायागंधर्वनगरादितुल्यस्यतत्स्वरूपस्याभ्युपगमात्।तस्मा
न्नकर्तृत्वमात्मधर्मःयथाचंआत्माकर्त्रादिरूपश्चेन्मोक्षांक्षीस्तर्हिमुक्ततांनहित्यभावोभावानांन्या
यवेत्तौस्तयवद्यवतिरिक्तंवकर्तृत्वंरागद्वेषादिविकारवतएवसंभवतितद्वांश्चदुःखीतिआत्मनोनुभू ॥११९

मानंसाक्षित्वंबाध्यते।यथोक्तं।नर्त्तक्यादिक्रियांदुरवीक्षतीताकाविकारिणः।धीविक्रियासहस्त्राणां
साक्ष्यहमविक्रियइति।नवसतोदेहाद्युपादानत्वेनहननक्रियाकर्मत्वंसंभवति।विवर्त्तवादाभ्यु
पगमात्।नह्यध्यस्तस्यधर्मैरधिष्ठानविकारोदृश्यते।यथोक्तंभाष्ये।यत्रयत्रयदध्यस्तंमतत्कृतेन
गुणेनदोषेणवाऽणुमात्रेणापिनसंबध्यतइतिविद्वतंचैतद्वैःनहिभूमिरूपैरवतीमृगतृष्णजलवाहिनी
सरितमुद्वहन्तिमृगवारिकूरपरिपूरवतीनदीनथोन्नारम्भुवंस्पृशन्तीति।एतेनकर्तृत्वकर्मत्वयोरना
त्मधर्मत्वादनात्मनश्चानेकरूपत्वादेकत्रात्मनितदुभयविरोधोऽपिनिरस्तोवेदितव्यः।एवंचार्वाकना
र्किकाभिमतोदेहात्मकर्त्रात्मवादोहंतावन्मन्यतेहंतुहतश्चेन्मन्यतेहतं।उभौतौनविजानीतोनायंहंति
नहन्यतइतिकाठकोक्तेनमंत्रेणपूर्वार्द्धपाठमेदात्पठितेनपरिहृतोवेदितव्यो॥११९॥श्रीरामकृष्ण॥

नायंहंतिनहन्यतइत्युक्तं तत्रनहन्यतइत्येतदुपपादयति तत्रस्थैर्वद्वितीयेनमंत्रेणनजायत
इतिअयंआत्माकदाचित्नजायतेअग्निनवानोत्पद्यतेनवाम्रियतेनिरन्वयोननश्यतितार्किका
भिमतघटवत्तत्रक्रमेणहेतुद्वयंअजोनित्यइति।अजत्वान्नजायतेनित्यत्वाच्चनवाम्रियतइत्य

नजायतेम्रियतेवाकदाचिन्नाहंभूत्वाभवितावानभूयः॥अजो
नित्यःशाश्वतोयंपुराणोनहन्यतेहन्यमानेशरीरे॥२०॥

थैःअस्तुतर्हिक्षणिकविज्ञानधारारूपःनस्थैर्यविज्ञानवादिभिःअजत्वनित्यत्वाभ्युपगमादित्या
शंक्याहभूत्वाभवितावानभूयइति।अयमित्यनुवर्त्तते।अयंभूत्वाभूयोभवितानभूयोऽसन्
त्भूत्वाभवितेतिभवनक्रियाद्वयस्यक्त्वाप्रत्ययोक्तंसमानकर्तृत्वंधौरेक्याभिप्रायेणभूत्वैव ॥१२०॥
भविता नतुभूत्वास्थित्वा विनश्यतताकिकाणांहिविज्ञानंउत्पत्तिस्थितिनाशलक्षणव्यापित्वा

क्षिणारस्थायि विज्ञानवादिनांतुपूर्वस्यनाशलक्षण एवोत्तरस्योत्पत्तिक्षणः सएवतस्यस्थितिक्षणश्चेतिक्ष
णिकत्वात्विज्ञानानांभवनक्रियाद्वयस्याव्यवधानाद्भूत्वाभवितेयुक्तं॥तादृशोप्ययंनयतःशाश्वतःशाश्वतेदृक्
रूपःयोहंबाल्यपितरावभूवंसोहंस्थाविरप्रणहंनतुभवामीतिबाल्यस्थाविरयोरात्मैक्यप्रत्यभिज्ञानात्॥
नचसादृश्यात्प्रत्यभिज्ञानंसादृश्यगृहीतुःस्थिरस्याभावात्।यद्वाजन्ममरणहीनोपिधर्मांतरविशिष्टःपूर्व
भूत्वापुनर्धर्मांतरविशिष्टोभवितेत्यपिनभूत्वैवभवितानत्वभूत्वेतियोजना।आर्हताहिशरीरपरिमाणमा
त्मानमभ्युपगच्छंतोनित्यस्यैकस्यैवात्मनःक्रमेणव्युत्क्रमेणवामशकमनुजमतंगजशरीरप्राप्तौपरिमाणभेदंम
न्यमानाःभूतस्यैवात्मनोविशेषणीभूतपरिमाणभवनादोषवारिकंभवनमभ्युपगच्छंतितदपिनशाश्वतत्वा
देव उपचयापचयवतोमध्यमपरिमाणस्यवस्तुनोनित्यत्वायोगात्।अनेनैवसुखदुःखादिधर्मांतरोत्पत्त्यात्म

नोभावकंभूत्वाभवनंत्रत्याख्ययं।नहिदुःखादिधर्मिणःस्वनाशमंतरेणआत्यंतिकदुःखोच्छेदःसंभवतिघ
टादौयावद्रूपनाशादर्शनात्ननज्ञत्वंनित्यत्वंवाकात्स्न्योप्यस्तिअतआह पुराणइतिपुराक्रियदा
दिसृष्टेःप्रागपिनवएवएतेनअपक्षयादिधर्मराहित्यान्मुख्यमज्ञत्वादिकंआत्मनाएवक्रियदादेस्त्वमुख्यं
तादितिदर्शितं।अतएवशरीरेहन्यमानेनहन्यतेभाष्यतुवाशब्दश्चार्थेवज्जायतेम्रियतेवेत्यर्थः तत्रोपपत्तिः
अयंनभूत्वाअभूत्वाअनुत्पद्यनभविताघटादिवदतोनजायते।अथवानभःपूर्वान्वयित्वंनजायतेनवा
म्रियतइति।यतोभूत्वाअभविताघटवद्विनाशिनःअतोनम्रियतइतिशाश्वतःपुराणइत्येताभ्यामपव
योपक्षयोनिषिध्येतइतिनहन्यतेनविपरिणम्यतइतिव्याख्यातंकेचिदेवमाहुःनजायतेम्रियतइ
तिप्रतिज्ञा।कदाचिदित्यादिनातस्याउपपादनं।अजइत्यादिरूपसंदारइति॥२०॥श्रीरामरूलवासुदेक॥

॥१२१॥

नायंहंतीत्येतदुपपादयतिवेदेति।विनष्टुंअदर्शनंगंतुंशीलमस्येतिविनाशिरज्जूरगतुल्यमुपाधित्रयंस्थू
लसूक्ष्मकारणशरीराख्यंततोन्यंअविनाशिनंअतएवनित्यंनाशहीनं।तत्रहेतुःअजंजन्मवान्हिअनि
त्यःअयंतुअजत्वान्नित्यश्चेत्यर्थः ननुविनाशिनःस्वकार्यापेक्षयाअन्यत्वमजत्वंनित्यत्वंवसांख्यामि

देवाविनाशिनंनित्यंयएनमजमव्ययं॥कथंसपुरुषःपार्थकंघातयतिहंतिकं॥२१॥

मतेप्रधाने।तार्किकाभिमतेनभसिवास्ति।अतउक्तंअव्ययमिति।नच्येतिपूर्वावस्थांत्यजतीत्यव्ययमपरि
णामिप्रधानंतुचलंगुणवृत्तमितिन्यायेनगुणसाम्यावस्थायामपिपरिणममाणमेवसर्वदास्तीतिते
षामभ्युपगमात्आकाशस्यापितस्माद्वाएतस्माद्वात्मनआकाशःसंभूतइतिउत्पत्तिश्रवणादजत्वा

भावादेवनाव्ययत्वं।तादृशंआत्मानंयोवेदअपरोक्षीकरोतिसपुमान्कथंकेनप्रकारेणकमन्यंघातयतिहनक्ति यायांप्रवर्त्तयतिकंवाहंतिनकेनचित्प्रकारेणकमपिघातयंतिनवाहंतीत्यर्थः द्वैभावात्॥तथाहिश्रुतिर्विद्यावस्थायांसर्वकारकव्यापारंनिषेधति।अत्रत्वस्यसर्वमात्मैवाभूत्तेनकंपश्येदित्यादिःअविद्यावस्थायामेववसर्वकारकव्यवहारंदर्शयतियत्रहिद्वैतमिवभवतितदितरइतरंपश्यतीत्यादि।एतेनसर्वकारकोपमर्दिन्याविद्यायाःसर्वकारकसापेक्षैःकर्मभिःसहसमुच्चयोनिरस्तःपरस्परविरुद्धस्वभावत्वेनशीतोष्णयोरिवह्योरेककार्यकारित्वस्यरथाश्वन्यायेनासंभवादित्यन्यत्रविस्तरःमादृश्यानांज्ञानिनांव्युत्थानकालेविद्योलशानुवृत्याघातयित्नत्वादेःप्रसक्तावपिविद्ययातस्यबाधितत्वादागामिकर्मणामश्लेषाच्चनदोषः तथाचवक्ष्यतेहत्वापिसइमान्लोकान्नहंतिनिबध्यतइति॥२१॥ श्रीराम॥ ॥१२२॥

ननुब्राह्मणोयज्ञेनजातपुत्रःकल्पेकेनाग्नीनादधीतेतिआत्मानंवयोवर्णादिविशेषणवंतमेवाधिकृत्यकर्मविधयःप्रवर्त्तंतेतेननीलादुत्पलमिवदेहादन्यआत्माऽवधारयितुंनशक्यतइत्याशंक्याहवासांसीति॥दंडीप्रेषानन्वोहेतिदंडस्यविशेषणत्वेपिनप्रेषानुवृत्तस्वरूपांतर्गतत्वंएवंब्राह्मणत्वादेरपिनस्वर्गकामस्वरू

वासांसिजीर्णानियथाविहायनवानिगृह्णातिनरोपराणि॥तथाशरीराणि विहायजीर्णन्यन्यानिसंयातिनवानिदेही॥२२॥

पांतर्गतत्वमितिवस्त्रदेवदत्तयोरिवजडाजडयोर्देहात्मनोरत्यंतविलक्षणत्वमस्तीति वस्त्रगेनदेवदत्तनाशेनान्यानस्येवतद्देहनाशादात्मनाशेनान्यानस्यात्यंतमोदासीन्यंस्पष्टमितिभावःस्पष्टमन्यच्छ्लोकः॥२२॥श्रीरामकृष्णवासुदेवायनमः॥सांबशिवायनमः॥

कीदृशोसौदेहीत्यतआह नैनमिति। एनंशस्त्राणिनच्छिंदंतिनैद्यंकुर्वंतिअस्थूलत्वात्। तर्हिपार्थि
वपरमाणुवत्याकजरूपाद्याश्रयोभविष्यतीत्याशंक्याह नैनंदहतिपावकइति। अनणुत्वात्आपश्चै
नं नेक्लेदयंतिअस्पर्शत्वात्। स्पर्शवद्धिद्रव्यमद्भिराद्रीकर्तव्यं नत्वस्पर्शं नशोषयतिमारुतःअस्मै

नैनंछिंदंतिशस्त्राणिनैनंदहतिपावकः॥ नचैनंक्लेदयंत्यापोनशोषयतिमारुतः॥२३

हत्वात्। एतेनअस्थूलमनणुअशब्दमस्पर्शमरूपमव्ययंतथारसंनित्यमगंधवच्चयदिति
श्रुतिप्रसिद्धानामदीर्घत्वाशब्दादीनामपिसंग्रहोद्रष्टव्यः॥२३॥श्रीरामकृष्णवासुदेवायनमः॥

॥१२३॥

कुतोहेतोरस्यशस्त्रादिभिश्छेदादीनकुर्वंतीत्याशंक्यतस्यच्छेदायोग्यत्वादित्याहअच्छेद्योयमिति।अ
त्राच्छेद्यत्वादौपूर्वकान्येवअस्थूलत्वादीनिकारणानिज्ञेयानि। एवमच्छेद्यत्वादिनाऽस्थूलादीन
भावरूपान्गुणानुक्त्वाभावरूपानपिगुणानाहनित्यइति। सर्वैर्विशेषणैररंडैकरस्यैववस्तुनो

अच्छेद्योयमदाह्योयमक्लेद्योशोष्यएवच॥ नित्यः सर्वगतःस्थाणुरचलोयंसनातनः॥२४

लक्ष्यत्वान्नित्यत्वादिभिरुत्पाद्यत्वादिकंनिराक्रियतेयतोनित्यअतोघटवदुत्पाद्योयतःसर्वगतः
अतोघटवदप्राप्यःयतःस्थाणुःपूर्वरूपापरित्यागेनस्थिरस्वभावःअतःक्षीरादिवदविकार्यःअ
चलःयथादर्पणःस्वतःस्वाच्छ्याद्प्रच्युतोपिमलरूपेणावरणेनस्वाच्छत्वंव्याप्यतेएवंस्वयंस्था

पुरपिअन्यसंयोगाद्भावित्वमश्नुवीतसर्वदोषापकर्षणलक्षणंसंस्कारमपेक्षते।अयंतुअवला त्वान्नतथा।एवंचउत्पत्त्याप्तिविकृतिसंस्कृतिरूपंचतुर्विधंक्रियाफलमात्मनिनसंभवतीत्युक्तं त्रैहतुःसनातनइतिसनाइत्यव्ययंनैरंतर्यो।तच्चदेशतःकालतोवस्तुतश्चपरिच्छेदराहित्यं।परमेतप रमाणूनांकालतःपरिच्छेदाभावेपिदेशपरिच्छेदास्तिआकाशस्यतदुभयाभावेपिवस्तुतःपरि च्छेदास्तिसोपित्रिविधःसजातीयविजातीयस्वगतभेदरूपःयथावृक्षस्यस्वगताभेदःपत्रपुष्प फलादितःवृक्षांतरात्सजातीयोविजातीयःशिलादितःतनश्चसनानैरंतर्येणत्रिविधपरिच्छे दराहित्यनभवतिअस्तीतिसनातनोऽखंडैकरसोयस्मात्तस्मात्नोत्पत्त्याद्यश्रयइत्यर्थः॥२४॥ ॥

॥१२४॥

एवंज्ञेयंवस्तूक्तंतच्चतत्राध्यात्मदेहत्रमनिरासेनअपरोक्षीकर्तव्यमित्याहअव्यक्तोयमिति।व्यक्तंस्थूलशरीरंप्र त्यक्षगम्यंतदन्योयंप्रत्यगात्माअतथाअचिंत्योयंचिंतायोग्यंरूपादित्रकाशकार्येणानुमेयंचक्षुरादिसमुदायात्म कंलिंगशरीरंअत्रत्यक्षंतनोप्यन्योयं।तथाअविकार्योयंविकारंस्थूलसूक्ष्मकार्यभावनावस्थानमर्हतीतिविकार्य त्रिगुणात्मकंमूलाज्ञानंकारणशरीरंसुप्तोत्थितस्यनकिंचिदेवदिषुमंतिपरामर्शदर्शनादहंनजानामीत्यनुभवाच्च

अव्यक्तोयमचिंत्योयमविकार्योयमुच्यते॥तस्मादेवंविदित्वैनंनानुशोचितुमर्हसि॥२५॥

साक्ष्येकगम्यं।ततोप्यन्योयंउच्यतेव्यक्तादिनिषेधमुखेन।ननुश्रुंगग्राहिकयाअयमेवंविधइतिविधिमुखेनोच्य तेव्यनोच्यतेतस्मादेवमयमुच्यतेनतस्मादेनंविदित्वानानुशोचितुमर्हसि।नरानुशोकमात्मविदितिश्रुतेरात्मविद्भूत्वाव धूवियोगजंशोकंमाकार्षीरित्यर्थःउक्तंचात्मनोऽवस्थात्रयातीतंतुरं।स्वप्ननिद्रायुतावायोप्राज्ञस्तंस्वप्ननिद्रया॥ ।ननिद्रांनैवचस्वप्नंतुर्यपश्यंतिनिश्चिताइति॥२५॥ श्रीरामकृष्णवासुदेवायनमः॥

एवंनत्वदृष्याशोकोनोचितइत्युक्तंइदानीप्राकृतजनदृष्यापिशोकोनोचितइत्युक्तंइदानीप्राकृतजनदृष्यापि शोकोनोचितइत्याहअथवेति। नित्यंनियमेनजातंनित्यजातमितिचार्वाकपक्षः नित्यंसर्वदाजातमि तिक्षणिकविज्ञानवादिपक्षः नित्यश्चासौअपूर्वदेहेंद्रियसंबंधाज्जातश्चेतिनार्किकादिपक्षः एवंनित्यंजा

अथचैनंनित्यजातंनित्यंवामन्यसेमृतं॥तथापित्वंमहाबाहोनैनंशोचितुमर्हसि॥२६॥
जातस्यहिध्रुवोमृत्युध्रुवंजन्ममृतस्यच॥तस्मादपरिहार्येर्थेनत्वंशोचितुमर्हसि॥२७॥

मन्यसेमित्यपियोज्यं। पक्षत्रयेपिशोकोनयुक्तः महाबाहोइतियुद्धार्थमुत्साहयति॥२६॥शोचितुंनार्हसी त्युक्तंतत्रहेतुमाहजातस्येतिध्रुवोपरिहार्यःमृत्युर्मरणं।अपरिहार्येअर्थेमरणाख्येत्वदुद्योगंविनापिअ वश्यंभाविनिविषयेनत्वंशोचितुमर्हसि।वक्ष्यतित्वमेवैतेनिहताःपूर्वमेवेति॥२७॥ श्रीरामकृष्ण॥

॥१२५॥

अस्त्वात्मनोऽशोच्यत्वंतथापिइष्टदेहविनाशजःशोकोभवत्येवेत्याशंक्यमकारणस्येदेहादेर्मिथ्यात्वं साधयतिअव्यक्तादीनीतिभूतानिपंचमहाभूतानितद्विकारभूतानिजरायुजादीनिचनव्यक्तमव्यक्तंअज्ञा नंतदेवआदिर्येषांतथाविधानिव्यक्तःस्पष्टःमध्यःउत्पत्तिमारभ्यमरणात्प्रागवस्थायेषांअव्यक्त

अव्यक्तादीनिभूतानिव्यक्तमध्यानिभारत॥अव्यक्तानिधनान्येवतत्रकापरिवेदना॥२८॥

एवनिधनंलयोयेषामितिअयमर्थः रज्जूरगादिकारणमज्ञानंनरज्जूवत्उरगबद्धाव्यक्तमत्तिप रीक्ष्यमाणंचनरुपिपथमवतरन्तिअतस्तदव्यक्तंततउत्पन्नःसर्पस्तत्रबलीयेतेनरज्वांएवंआत्म निकल्पितानांभूतानांआदिरंतश्चाव्यक्तमेवतेनआदावंतेचयन्नास्तिवर्त्तमानेपितत्तथेतिन्यायेन

मध्येभासमानान्यपितानिरज्जूरगवत्असत्येवएवंविधेतत्रनास्मिन्विषयेकापरिदेवनाकोवाविलापःनहि मरुमरीचीकाह्रदोनष्टइतिकश्चित्तत्वावित्विलपति।अतएवभूतानांरज्जूरगादीनांमिथ्यात्वप्रतीतिसमकालिकी सृष्टिमपिप्रत्यक्षीषीतकिंब्रह्मणस्वापप्रबोधयोर्जगल्लयोदयौपव्येतसयदास्वपितितदेनंवाकसर्वैर्नामभिः सहाप्यतिचक्षुःसर्वैरूपैःसहाय्यतिश्रोत्रंसर्वैःशब्दैःसहाय्यतिमनःसर्वैर्ध्यानैःसहाय्यतिसयदाप्रबुध्य तेऽथैनस्मादात्मनःसर्वेप्राणायथायतनंविप्रतिष्ठंतेप्राणेभ्योदेवादेवेभ्योलोकाइतिप्राणाःचक्षुरादी न्द्रियाणिदेवास्तदनुग्राहकासूर्योदयःलोकाःसृष्टयादयःनान्यिहान्यत्रच।आत्मैवसर्वभूतानांलयोदयस्था नमित्युच्यते।सत्यंअज्ञानाश्रयत्वाद्ब्रह्मणितथात्वव्यपदेशोनवस्तुगत्यानहिअपरिणामिनःकू टस्थस्यमृद्घटकार्यप्रविलयोदयस्थानत्वंसंभवतियथोक्तं॥अस्यदृतेर्दृज्जालस्ययदुपादानकार णंअज्ञानंतदुपाश्रित्यब्रह्मकारणमुच्यतइति॥१०॥ श्रीरामकृष्णवासुदेवायनमः॥



॥१२६॥

ननुवज्रपंजरतुल्यस्यसर्वप्रमाणसिद्धस्यवियदादिप्रपंचस्यकथंरज्जूरगादिवदज्ञानप्रभवत्वेनात्यंत तुच्छत्वमुच्यतेकथंवाकर्मज्ञानकांडापेक्षितमात्मनोयज्ञादिकर्तृत्वंश्रवणादिकर्तृत्वंवापह्नूयतइत्याशं क्याहआश्चर्यवदिति॥कश्चिदेनमज्ञानात्मतत्वएनंअतीतानंतरश्लोकोक्तंभूतग्रामंआश्चर्यवत्आ श्चर्य आश्चर्यवत्पश्यतिकश्चिदेनमाश्चर्यवद्वदतितथैवचान्यः॥आश्चर्य वच्चैनमन्यःशृणोतिश्रुत्वाप्येनंवेदनश्चैवकश्चित्॥२९॥

श्चर्यअद्भुतंस्वप्नमायेंद्रजालादिकंतेननुल्यंआश्चर्यवत्तथाभूतंपश्यति।तथाकश्चिदेनंआश्चर्यवत् वदति।सत्वेनअसत्वेनवानिर्वक्तुमशक्यमपिअनिर्वचनीयेनैवलोकाप्रसिद्धरूपेणोपपादयति तथाहिरज्जूरगवत्प्रपंचःसंश्चेत्तेनेहनानास्तिकिंवचनेनिश्चित्यानवाध्यतअसंश्चेन्नप्रतीयत।तस्मा

दनिर्वचनीयोयमिति तदिदं सर्वं व्यवहारस्यदस्यापि प्रपंचस्य मिथ्यात्वापपादनमत्याश्चर्यमित्यर्थः तथाए
नंप्रपंचं अन्यआश्चर्यवत्पृणोति इमेलोकाइमेदेवाइमेवेदाइदं सर्वंयदयमात्मेति प्रत्यक्षेण अनात्मत
याउपलभ्यमानस्यापिप्रपंचस्ययत्प्रत्यगात्मनारणं तदत्यंतमाश्चर्यं। नहीयंश्रुतिः यजमानः प्रस्तरइ
त्यादिवदुपवरितार्थाप्रपंचस्यात्मनः पृथक्त्वे आत्मनोवाअरेदर्शनेनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदि
तंभवतीत्येकंविज्ञानात्सर्वविज्ञानप्रतिज्ञापरोधापत्तेः नवप्रतिज्ञाप्योपचारिकीप्रदर्शनांतरश्रुतस्ययथा
सोम्यैकेनमृत्पिंडेनसर्वंमृन्मयंविज्ञानंस्यादितिदृष्टांतस्योपरोधापत्तेः तस्मात्प्रतिज्ञादृष्टांतनिगमना
नामेकवाक्यत्वात्नप्रपंचस्यात्मान्यत्वनचभेदग्राहिप्रत्यक्षविरोधादाश्चर्यमिवशृणोति। तथाकश्चि
देनंप्रपंचंप्रत्यगनन्यत्वेनश्रुत्वाअपिश्रद्दधानउक्तास्वप्नादिदृष्टांतैरुपपाद्यदृष्ट्वाध्यानेनचसाक्षात्कृ
त्वापितत्वतोनवेदनजानाति। तथाहिप्राप्तापिप्रज्ञातीव्रविक्षेपवतःपरिहीयतइतिवक्ष्यति तस्मादा

॥१२७॥

मैक्यात्संभवत्येवप्रपंचस्यरज्जूरगादितुल्यत्वेनतुच्छत्वंयद्वाएनंआत्मनंकर्तृत्वभोक्तृत्वदुःखित्वनित्य
त्वपरिच्छिन्नत्वादिधर्मवत्तयाप्रसिद्धमपितत्वमसीत्यागमीड्याब्रह्माकारंतः करणवृत्याब्रह्मविद्यारूप्य
याअभोक्तारमभोक्तारमानंदघनंसत्यविद्रूपंसंमेगमनंतमपरोक्षीकरोतीतिमहदाश्चर्यंयत्पश्यतिद
तदाश्चर्यवदितिक्रियाविशेषणंवा आविद्यकमपिदृश्यनमविद्यास्वात्मानंस्वकृतकरजोवन्निवर्तयती
ति यद्वायःपश्यतिसआश्चर्यवदितिकर्तृविशेषणंयत्एकएवविद्वान्समाधिव्युत्थानयोःपरस्पर
विरुद्धमात्मनोब्रह्मभावंजीवभावंचयावदारब्धकर्मक्षयमनुभवतीति तथावाऽन्यनसातीतमप्या
त्मानंयद्वावदतितदप्याश्चर्ये अगृहीतसंगतिकेनापिन्नाद्दृनयथासुप्तःप्रबोध्यतेनदृत्यथोक्तं
वार्त्तिकेअगृहीत्वैवसंबंधमभिधानाभिधेययोः। हित्वानिद्रांप्रबुध्यंतेसुषुप्तबोधिताःपरैः। ज्ञाय

दूनयतःशब्दःसुषुप्तवेत्तिकश्चन।नश्वस्तोऽतोज्ञानतोऽज्ञानेब्रह्मास्मीतिभवेत्फलं।अविद्याद्यात्मनः
स्वाद्याहंब्रह्मेतिधीर्भवेत्तन्नश्यत्यविद्ययासार्धंहत्वारोगमिवौषधमितितथायःश्रुणोतिःसोपिआश्च
र्यवत्अतिदुर्लभइत्यर्थःश्रवणायापिबहुभिर्योनलभ्यइतिश्रुतेःशृण्वंतोपिबहवोयन्नविद्युरि
तिश्रुतिर्द्वितीयपादार्थंसंगृह्णातिश्रुत्वाप्येनंमितिं।आश्चर्योवक्ताकुशलोस्यलब्धाआश्चर्योज्ञा
ताकुशलेनानुशिष्टइतिउत्तरार्धस्तुश्लोकपूर्वार्धेनसंगृहीतइतिज्ञेयं।दुर्विज्ञेयोयमात्मानत्वंतज्ञा
नार्थंयतस्वेतिभावः॥२९॥ श्रीरामकृष्णवासुदेव॥

॥१२८॥

त्रकृतमर्थमुपसंहरन्निदेहीति।सर्वाणिभूतानिकथमेतेदीनाअल्पबलाःबलवन्नरेणमयाहंतव्याःकथमे
षांपुत्रादयएतैर्विनाजीविष्यंतिकथंवाऽहंमीष्मादिभिर्गुरुभिर्विनाजीविष्यामीतिशोचितुंनार्हसीत्यर्थः
॥३०॥अर्जुनस्यअनात्मनिदेहेआत्मधीरूपोमोहोनिवारितःइदानींस्वधर्मेयुद्धेअधर्मधीरूपंमोहंनि

देहीनित्यमवध्योयंदेहेसर्वस्यभारत॥तस्मात्सर्वाणिभूतानिनत्वंशोचितुमर्हसि॥३०॥
स्वधर्ममपिचावेक्ष्यनविकंपितुमर्हसि॥धार्म्याद्धियुद्धाच्छ्रेयोन्यत्क्षत्रियस्यनविद्यते॥३१॥

वारयतिस्वधर्ममपीत्यादिना।युद्धंक्षत्रियस्यस्वधर्मःतमवेक्ष्यापिविकंपितुंचलितुंनार्हसिहियस्मा
त्धर्म्यात्धर्मादनपेताद्युद्धादन्यत्क्षत्रियस्यश्रेयःप्रशस्ततरंनास्ति॥३१॥ श्रीरामकृष्णवासुदेव॥

किंवयदृच्छयाअप्रार्थितमप्युपपन्नंउपस्थितंस्वर्गद्वारंअपावृतमुद्घटितंयेक्षत्रियाःलभंतेनसुखिनोधन्या

यदृच्छयाचोपपन्नंस्वर्गद्वारमपावृतं॥सुखिनःक्षत्रियाःपार्थलभंतेयुद्धमीदृशं॥३२॥
अथचेत्वमिमंधर्म्यंसंग्रामंनकरिष्यसि॥ततःस्वधर्मंकीर्तिंचहित्वापापमवाप्स्यसि॥३३
अकीर्तिंचापिभूतानिकथयिष्यंतितेव्ययां॥संभावितस्यचाकीर्तिर्मरणादतिरिच्यते॥३४

॥१२९॥

भवंतीतिसंबंधः।३२॥युद्धत्यागेदृष्टानाशोऽनिष्टमाप्तिश्चभवतीत्याहअथचेदिति॥३३॥अव्ययांदीर्घकालां॥३४॥

अकीर्तिमेवाहभयादिति॥त्वंबहुमतोभूत्वास्वतएवअतिश्लाघ्यवृत्तःसन्लाघवंलघुभावका
र्षीर्व्यंयेषांपुरतोयास्यसितेमहारथास्त्वांभयाद्रणादुपरतंमंस्यंतेतेषांतियोजना॥३५॥किंच॥

भयाद्रणादुपरतंमंस्यंतेत्वांमहारथाः॥येषांचत्वंबहुमतोभूत्वायास्यसिलाघवं॥३५॥
अवाच्यवादांश्चबहून्वदिष्यंतितवाहिताः॥निंदंतस्तवसामर्थ्यंततोदुःखतरंनुकिं॥३६॥

वाच्यवादान्वक्तुमयोग्यान्पंडितोर्जुनइत्यादीन्सामर्थ्यंनिंदंतःधिगस्यशौर्यंयोभीष्मादिभया
त्पलायितइतिइदंवचनंमरणादप्यधिकंदुःखंनइतोन्यत्किंचिदुःखतरमधिकंदुःखंकिंनकिमपीत्यर्थः॥३६॥

यद्वा जयेमयदिवा नो जयेयुरित्युक्तं तत्राह हतोवेति रणेस्थिरस्यस्वर्गोवा राज्यं वासिद्धमस्तीतिपक्षद्वय
मपिहितावहमित्यर्थः॥३६॥स्वधर्मस्ययुद्धस्याकरणेधर्मकीर्त्योर्नानः पापावाप्तिश्चार्थवेदितिश्लो
केनभगवतायद्यप्युक्तं तथापियुद्धस्यअर्जुनाभिमतेकाम्यत्वपक्षेअहोबतमहत्पापंकर्तुंव्यवसिता

हतोवाप्राप्स्यसिस्वर्गं जित्वावाभोक्ष्यसेमहीं॥तस्मादुत्तिष्ठकौंतेययुद्धायकृतनिश्चयः॥३७॥
सुखदुःखेसमेकृत्वालाभालाभौजयाजयौ॥ततोयुद्धाययुज्यस्वनैवंपापमवाप्स्यसि॥३८॥

वयंयद्राज्यसुखलोभेनहंतुंस्वजनमुद्यतास्तितत्करणेपापप्रसक्तिरस्तितांनिवारयितुंसिध्यसिध्योः ॥१३०॥
समत्वलक्षणंयोगमाह सुखदुःखेइति।समकृत्वासुखदुःखयोस्तद्धेत्वोःराज्यलाभालाभभयोस्त

द्धेत्वोश्च जयाजययोः रागद्वेषावकृत्वेत्यर्थः केवलंस्वधर्मोयमितिमत्वायुद्धायतयुज्यस्वघटस्वएवंकु
र्वंस्त्वंपापंनावाप्स्यसियस्तुराज्यलोभेनसुहृद्वधंकरोतियस्यास्त्येवपापमितिभावः कथंतर्हिस्व
धर्मत्वेनानुष्ठितेपियुद्धेहतोवाप्राप्स्यसिस्वर्गमित्यादिफलस्मरणंआनुषंगीकमितिब्रूमः नथावा
पस्तंबः तद्यथाम्रफलार्थेनिर्मितेछायागंधइत्यनूद्यतेएवंधर्मंवर्यमाणमर्थोअनूद्यते
नधर्महानिर्भवतीतिआम्रनिदर्शनेनप्रतिपादयति॥३८॥ श्रीरामकृष्णवासुदेवायनमः॥

एवमर्जुनस्यपूर्वोक्तौदावपिमोहावपनीतौतत्रकंघातयतिहंतिकमितिकर्तृत्वकारयितृत्वयोरात्मन्यसं
भवउक्तःततोयुद्धायुज्यस्वेतिवियोगश्चोक्तःनत्वकर्तुराकाशवत्सर्वगतस्यनियोज्यत्वंसंभवतीतिपरस्प
रव्याहतमनादृतीमामाशंकांअधिकारिभेदेनउभयंव्यवस्थापयन्परिहरति।एषातेऽभि॥एषातेनु

एषातेभिहितासांख्येबुद्धिर्योगेत्विमांशृणु॥बुध्यायुक्तोययापार्थकर्मबंधंप्रहास्यसि॥३९

भ्यंअभिहिताअनुव्याख्यानन्नोक्तवस्त्वमित्यादिनास्वधर्ममपिचावेक्ष्यस्यतःप्राक्तेनसंदर्शनउक्ता
सांख्येसम्यक्ख्यायतेप्रकथ्यतेवस्तुतत्वमनयेतिसंख्याउपनिषत्तत्रविदितसांख्यऔपनिष
देब्रह्मणिविषयेबुद्धिर्ज्ञानंसंसारनिवर्तकं।एषातेसांख्यबुद्धिरभिहितेतिसंबंधःयोगेत्विमांशृणु

समोभूत्वासमत्वंयोगउच्यतइतिवक्ष्यमाणलक्षणेविषयेतुनाद्रःपूर्ववैलक्षण्यद्योतनार्थःवक्ष्यतिव
ज्ञानकर्मनिष्ठयोर्विभिन्नाधिकारित्वं।लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ॥ज्ञानयोगेन
सांख्यानांकर्मयोगेनयोगिनामिति।एतेनज्ञानकर्मणोःसमुच्चयंनाकाप्यपास्ताऽमांस्वधर्ममपि
चावेक्ष्यसीत्यादिनाऽनंतरग्रंथेनोक्तामपिविस्तरेणाभिधीयमानांशृणुऽमामेवबुद्धिंस्तौतिसार्धेनबु
ध्येत्यादिना।ननुकर्मबंधप्रहाणमात्मज्ञानेनैवश्रूयतेतस्यैवात्मपदंविदित्वानलिप्यतेकर्मणापाप
केनेतिश्रुतेःकर्मयोगस्तुकर्मबंधदृढीकरिष्यत्येवेतिकथमुच्यतेकर्मबंधंप्रहास्यसीतिचेत्श्रु
तिबलात्तिब्रूमःतथाहिईशावास्यमिदंसर्वंयत्किंचजगत्यांजगत्एतेनत्यक्तेनभुंजीथामागृधः
कस्यस्विद्धनंकुर्वन्नेवेहकर्माणिजिजीविषेच्छतंसमाःएवंत्वयिनान्यथेतोस्तिनकर्मलिप्यतेन

रेवृत्तिश्रुतिरीश्वरेणेदंसर्वंस्तंभितमस्तीतिनकश्चित्किंचित्स्वेच्छयाकर्तुंप्रभवतिअतःसर्वत्रममता
हीनःसन्नुभोक्तृत्वाभिमानत्यागेनैवभोगान्भुंक्ष्वकर्माणिचकुरुएवंकुर्वतित्वयिकर्मलेपोना
स्तिरतोन्यदुपायांतरंवनास्तीतिवदतितस्मात्कुतर्ककाश्लीयमादिवत्कुनाविद्दूषरूपेणो
पेतंकर्मैवसजातीयोच्छेदनिमित्तंभविष्यतीतियुक्तमुक्तंकर्मयोगेनापिकर्मबंधंप्रहास्यसीति
॥३९॥ श्रीरामकृष्णवासुदेव॥

॥१३२॥

एतदेवोपपादयतिनेहेति।इहकर्मबंधप्रहाणेर्थेकर्मयोगेऽनुष्ठीयमानेअभिक्रम्यतेन्याप्यतइत्यभि
क्रमःकर्मारंभःकर्मैववातस्यनाशोनास्तिअंन्यत्तुफलंदत्वानश्यतिनत्विदमिष्टफलस्याजननात्।
नन्वेतस्यापिकाम्यांतःपातितयानित्याकरणजनितःप्रत्यवायउत्पद्येतेवमकृदनुष्ठितस्यवं

नेहाभिक्रमनाशोस्तिप्रत्यवायोनविद्यते॥स्वल्पमप्यस्यधर्मस्यत्रायतेमहतोभयात्॥४०

धप्रहाणप्रत्यवायपरिहारव्यपदेशेहेतुत्वायोगादित्याशंक्याहप्रत्यवायोनविद्यतइति॥
तमेतंवेदानुवचनेनब्राह्मणाविविदिषंतियज्ञेनदानेनतपसाऽनाशकेनेतिश्रुत्यासंयोगपृथ
क्त्वन्यायेनदर्शेंद्रियकामस्यजुहुयादित्यनेननित्यस्यदर्शोवीर्योर्थत्वमिवनित्यानामपिकर्मणां

विविदिषार्थत्वंविनियोगबलान्मिथ्यति।ततश्चकाम्येनैवप्रयोगेणनित्यस्यापिसिद्धेर्ननित्याकरणनिमित्तो
वाकाम्यत्वात्सर्वांगानुपसंहारेनिमित्तोवाप्रत्यवायोविद्यते।नित्यानामेवविनियोगात्नित्येषुवयथाशा
क्युपबंधस्यानुज्ञानात्नवार्तिकेतुकाम्यानामप्यत्रषिनियोगोदृष्टःयथा।वेदानुववनादीनामैकान्म्यज्ञा
नजन्मने।तमेतमितिवाक्येननित्यानांवक्ष्यतेविधिः।यद्वाविविदिषार्थत्वंकाम्यानामपिकर्मणां।तमेतमि
तिवाक्येनसंयोगस्यपृथक्कृतइति।अस्मिन्पक्षेकाम्यानामपितुल्यफलत्वात्नित्यवद्यथाशक्युपबंधो
भविष्यतीतिनसर्वांगानुपसंहारेनितःप्रत्यवायोविद्यते।स्वल्पमप्यस्ययोगधर्मस्यानुष्ठितंअनुप
भुक्तबीजकल्पंजन्मजन्मांतरेप्यस्तंदानमध्ययनंतपः।तेनैवाभ्यासयोगेनतच्चैवाभ्यसतेपुनरिति
स्मृतेरुत्तरोत्तरसंस्काराधानद्वारास्वसजातीयवृद्धेर्निमित्तंसत्कामादिदोषक्षपणद्वारामहतोभया
त्संसारात्त्रायतेतस्मात्संरव्यानधिकारिणाकर्मयोगएवानुष्ठेयइतिभावः॥४०॥श्रीरामकृष्ण॥ ॥१२३॥

नन्वेवंसांख्ययोगयोःमहाभयात्त्राणहेतुत्वंतुल्यंवेत्कोनयोर्विशेषइत्याशंक्यसांख्यानांपातञ्जलानास्तियो
गिनांतुयावद्दिदेहकैवल्यंपातञ्जलास्तीत्याह।व्यवसायात्मिकेति।व्यवसायस्तत्वनिश्चयस्तदात्मिकातदाकारा
बुद्धिरंतःकरणवृत्तिःअहंब्रह्मास्मीतिवाक्यजन्याब्रह्माकारांतःकरणवृत्तिर्ब्रह्मविद्याभिधानासमस्तवृत्यंतर

व्यवसायात्मिकाबुद्धिरेकेहकुरुनंदन॥बहुशाखाह्यनंताश्चबुद्धयोव्यवसायिनां॥४१॥

बाधेनसमभ्युदिताएकाएकेवमरुद्भिर्भातीत्येषब्रह्मलोकइतिश्रुतेःब्रह्मैवलोकोब्रह्मलोकइहब्रह्मैव।नहिसरु
तज्ज्ञानेब्रह्मणज्ञातव्यंकर्तव्यंवाकिंचिदवशिष्यते।कृतकृत्यत्वाद्दृष्टविदोऽतोस्त्वपातञ्जलानास्तिअव्यवसा
यिनामज्ञानिनांतुबुद्धयोऽनंताःताश्चप्रत्येकंबहुशाखाइतिइदमेवममश्रेयइतिनिश्चयस्यदुर्लभत्वात्कदा
चिदश्रेयस्यपिश्रेयोबुद्धेरस्त्यपातञ्जलानि।महांस्तुयोविशेषइतिभावः॥४१॥

उत्तरार्द्धमेवविवृणोतियामिमामित्यादिना।अव्यवसायिनोमूढाःयांपुष्पितांपुष्पितद्रुमवद्रूतोमरणीयांवाचंअ
क्षय्यंहवैवातुर्मास्ययाज्जिनःसुकृतंभवतिअपामसोममभूमेत्येवंरूपांप्रवदंतिअविपश्चितःअव्यव

यामिमांपुष्पितांवाचंप्रवदंत्यविपश्चितः।।वेदवादरताःपार्थनान्यदस्तीतिवादिनः॥४२॥

सायिनोमूढाःयतोवेदवादरताःवेदांतर्गतेषुअर्थवादेषुयस्यपर्णमपीज्जुहुर्भवतिनसपापंश्रु
पांश्लोकंशृणोतीत्येवमादिषुरताःबद्धश्रद्धाःअतएवकर्मणोन्यत्।आत्मज्ञानंतत्फलंमोक्षश्च
नास्तीतिवादिनोवदनतीत्यर्थः॥४२॥ श्रीरामकृष्णवासुदेवायनमः॥

तथाभोगाश्चैश्वर्यंचतयोर्गतिप्राप्तिःतांप्रतितदर्थमित्यर्थःकामात्मानःकामयस्तद्विज्ञाःअतएवस्वर्गपराःकी
र्त्तौभोगैश्वर्यगतिंजन्मकर्मफलप्रदांप्राप्तभोगैश्वर्याहिपुरुषस्तद्वासनावासितःपुनर्भोगैश्वर्यप्राप्तयेजन्म
लभतेतदर्थंकर्मणिवकुरुतेफलंवततोभोगादिकंप्राप्नोतीतिवक्रमनिरूपमावर्त्ततेतेननिष्ठातश्च्युतोभवतीत्यर्थः

कामात्मानःस्वर्गपराजन्मकर्मफलप्रदां॥क्रियाविशेषबहुलांभोगैश्वर्यगतिंप्रति॥४३॥

किंचक्रियाविशेषबहुलांयथायथाविशेषव्याप्तायाधिक्यंतथातथाभोगैश्वर्यप्राप्तेरप्याधिक्यमित्यर्थः
एतेनात्यंतायासमाध्येष्वपिकर्मसुफललोभादज्ञंतइत्युक्तंभाष्येभोगैश्वर्यगतिंप्रतिसाधनभूताःयेक्रि
याविशेषाअग्निहोत्रादयःतद्बहुलां।जन्मरूपंयत्कर्मफलतत्प्रदांवाचमेवेतिव्याख्यातं॥४३॥श्रीराम॥

भोगेति॥यथाश्रुतिषुष्पितयावाचाअपहृतचेतसांपुंसांबुद्धिःसमाधौसमाध्यनुष्ठानकालेव्यवसायात्मिकाव्यवसायोज्ञानंनंदात्मिकाशुद्धविन्मात्राकारानविधीयेत।नभवतिकर्मकर्तरिलकारः

भोगैश्वर्यप्रसक्तानांतयापहृतचेतसां॥व्यवसायात्मिकाबुद्धिःसमाधौनविधीयते॥४४

विरक्तस्यहिबुद्धिंसमाधौविन्मात्राकारा भवतिनतुभोगाद्यासक्तस्येतिस्पष्टमवभाष्यितु समाधौअंतःकरणेव्यवसायात्मिकाबुद्धिनभवतीतिव्याख्यातं।यद्वासमाध्यनुष्ठानार्थमेव निश्चयात्मिकानैषाबुद्धिर्नभवतीतिव्याख्येयं॥४४॥ श्रीरामकृष्णवासुदेवासुदेवायनमः

कस्यतर्हिसमाधौबुद्धिर्भवतीत्यतआहत्रैगुण्येति।त्रैगुण्यंगुणत्रयकार्यऊर्ध्वमध्याधोगतिरूपंसंसरणंतद्वत्रकाम्यत्वेनविषयीयेषांतादृशाःकर्मकांडपरावेदाःत्वंतुनिस्त्रैगुण्याभवऊर्ध्वगतावपिविरक्तोभवत्यर्थःवक्ष्यतिवतन्त्रऊणप्रधानंगतित्रयंऊर्ध्वंगच्छंतिसत्वस्थाइति।दिव्यभ्योपि

त्रैगुण्यविषयावेदानिस्त्रैगुण्योभवार्जुन॥निर्द्वंद्वोनित्यसत्वस्थोनिर्योगक्षेमआत्मवान्॥४५

विषयभ्योविरक्तःसमाधावपिक्रियतइतिभावःकिंलक्षणोसौनिस्त्रैगुण्यइत्यतआहनिर्द्वंद्व इति।सुखदुःखेमानापमानौशत्रुमित्रौशीतोष्णइत्यादीनिद्वंद्वानिसप्रतिपक्षपदार्थरूपाणितेभ्योनिर्गतोनिर्द्वंद्वःसर्वत्रसमबुद्धिरित्यर्थःननुबाधमानमुष्णादिकंकथंशीतादिवत्मंनुष्याक्ष

मतआहनित्यसत्वस्थइतिनित्यंसर्वदासत्वंधैर्यसत्वगुणोवानदाश्रितोभूत्वाधीरोहिसर्वंसोढुंशक्नोसा
त्विकोवाप्रारब्धकर्मोपस्थापितमिदंदुःखमपरिहार्यंकिमुतप्रतयेतिजानन्सर्वंसोढुंशक्नोत्येवननुअ
त्यंतदुःसहंक्षुधादिदुःखंकथंनिस्त्रैगुण्यनसर्वथाप्रवृत्तिशून्यनसोढुंशक्यमतआहनिर्योगक्षेमइ
तिअप्राप्तस्यप्राप्तिर्योगःप्राप्तसंरक्षणंक्षेमःएतदुभयमपिप्रारब्धकर्माधीनमितितत्रापिनिर्गतइ
त्यर्थःतत्रहेतुःयतःआत्मवान्जितचित्तःसहिसर्वास्वप्यापत्सुअनाकुलोनित्यतत्तयोनेनिश्चयम
श्रभवतीतित्वमप्येतादृशोभिस्त्रैगुण्याभवेत्यर्थः॥४५॥ श्रीरामकृष्ण॥

ननुआत्मवत्वंचित्तशुद्धौसत्यामेवभवतिसाचसकलवेदोक्तकर्मानुष्ठानसाध्याअतोनिस्त्रैगुण्यत्वंदुर्लभमि
त्याशंक्याहयावानिति।सर्वतःसंप्लुतोदकेमहतिउदपानेजलाशयेषुपुरुषस्ययावन्अर्थःयावत्स्नानपाना
दिकंप्रयोजनंघटमात्रजलनिर्वर्त्यंभवतिनरुक्तजलाशयव्ययनिर्वर्त्यं।तावानेवानेवार्थःविजानतोमुस

यावानर्थउदपानेसर्वतःसंप्लुतोदके॥तावान्सर्वेषुवेदेषुब्राह्मणस्यविजानतः॥४६॥

ननित्यस्यब्राह्मणस्यब्रह्मवुभुत्षोःसर्वेषुवेदेषुवेदेकदेशापनिषच्छ्रवणमात्रनिर्वर्त्योभवतिनरुक्तवेदार्थो
नुष्ठानंस्वसिध्यर्थमपेक्षते।एकेनजन्मनाकृत्स्नवेदार्थानुष्ठानासंभवात्।एहिकेनजन्मांतरीयेणवा
जपादिनाचित्तशुद्धौसत्यामुपनिषच्छ्रवणान्निस्त्रैगुण्यतासंभवतीतिभावःदृष्टान्तुसर्वतःसंप्लुतोदकस्था

नीयेआत्मज्ञानेपुरुषस्यतावानर्थः कृत्स्नोपिभवतियावान्अनेककूपतडागोदपानस्थानीयेषुसकलवेदो क्तकर्मस्वनुष्ठितेषुभवति।ब्रह्मानंदक्षुद्रानंदानामंतर्भावात्तथाचश्रुतिर्ज्ञानेसर्वकर्मफलांतर्भावंदर्शयति।यथाकृतायविजितायाधरेपाःसंयंत्येवमेवैनंसर्वंतदभिसमेतियत्किंचप्रजाःसाधुकुर्वंतियस्तद्भवयय त्तवेदेति वक्ष्यति।वत्सर्वंकर्माखिलंपार्थज्ञानेपरिसमाप्यतदतिगंगातुल्यज्ञानोदयात्। प्रागेवकूपोपमानिकर्माणिकर्त्तव्यानीतिभावउक्तिर्व्याचक्ष्युः।अत्रिन्नपक्षेपूर्वार्द्धेअनेकस्मिन्यथा तथाभवतीतिपदंवनुष्टयाध्याहारःयावान्तावान्पदयोरनुषंगश्चदार्ष्टांतिकेद्रष्टव्यः॥४६॥

॥१३७॥

ननुममापिऔपनिषदात्मज्ञानार्थिनःश्रमएवेष्टस्तत्कथंमांयुद्धेतिप्रेरयसीत्याशंक्याहकर्मण्येवेति। कर्मण्येवाधिकारस्तेनज्ञाननिष्ठायांमाफलेषुसंगोस्त्वित्यपरुक्ष्यतेकर्मफलस्वर्गपश्वादिहेतुःकर्मसुप्रव र्त्तेकंयस्यतादृशोमाभूःअकर्मणिकर्माकरणेपितवसंगोमास्तु॥४७॥तदेवविवृणोतियोगस्थइति।योगस्थः

कर्मण्येवाधिकारस्तेमाफलेषुकदाचन॥माकर्मफलहेतुर्भूर्मातेसंगोस्त्वकर्मणि॥४७॥
योगस्थःकुरुकर्माणिसंगंत्यक्त्वाधनंजय॥सिध्यसिध्योःसमोभूत्वासमत्वंयोगउच्यते॥४८॥

ननूसंगंफलतृष्णांकर्तृत्वाभिमानंचत्यक्त्वाकर्माणिज्ञानार्थंकुरुहेधनंजयसिध्यसिध्योकर्मफलस्यविवि दिषादिःसिद्धौअसिद्धौचासमोहर्षविषादशून्योभूत्वाकर्माणिकुर्वीतिसंबंधःइदमेवसिध्यसिध्योःसमत्वं योगउच्यते॥४८॥श्रीरामकृष्णवासुदेवायनमः॥

एतदेवाह कर्मजामिति। बुद्धियुक्ताः समत्वबुद्धियुक्ताः क्रियमाणकर्मजंफलंत्यक्त्वामनीषिणोम

कर्मजंबुद्धियुक्ताहिफलंत्यक्त्वामनीषिणः॥जन्मबंधविनिर्मुक्ताः पदंगच्छंत्यनामयं॥५१॥

नोनिग्रहसमर्थाभूत्वाजन्मरूपेणबंधेनमुक्ताः संतोऽनामयंनिरूपद्रवंपदंमोक्षाख्यंगच्छंति॥५१॥

कदामनीषिणोभवंतीत्यतआहयदेतित्ततवमोहःइष्टानिष्टवियोगसंयोगजपरितापजन्यंवैक्लिव्यं तदेकेवलिलंमिवकलिलंकालुष्यंबुद्धिगतंबुद्धिर्व्यतितरिष्यतिव्यतिक्रमिष्यतिबुद्धिप्रसन्नाभविष्यति तदाश्रौतव्यस्यशास्त्रभागस्यश्रुतस्यचनिर्वेदवैराग्यंगंतासिअयंभावःमलिनायांबुद्धौअसत्कृही

यदातेमोहकलिलंबुद्धिर्व्यतितरिष्यति॥तदागंतासिनिर्वेदंश्रोतव्यस्यश्रुतस्यच॥५२॥

तस्यापिशास्त्रार्थस्यास्फुरणात्श्रोतव्यंश्रुतंवदृथैवनदूत्शुद्धायामपिबुद्धौसत्यशास्त्रार्थस्फुरणात् तयोर्वैयर्थ्यमित्युपायथापितत्रनिर्वेदउचितःप्रसन्नावबुद्धिर्निग्रहीतुंयोग्याभवतीतिश्रवणादि कंत्यक्त्वाध्याननिष्टएवभवेदिति॥५२॥श्रीरामकृष्णवासुदेव॥

ननुबुद्धिप्रसादोपिकेनलिंगेनज्ञेयइत्यतआहश्रुतीतिश्रुतिभिर्नानाविधयाशास्त्रश्रवणैर्विप्रतिपन्नाआत्मनि त्योऽनित्योवानित्योपिकर्त्ताऽकर्त्तावाऽकर्त्तोप्येकोऽनेकोवेत्येवमादिसंशययस्तासतीयदाऽसंभावना विपरीतभावनानिरासपूर्वकंश्रुतितात्पर्यविषयीभूतेब्रह्मादितेनिश्चलापुनःकुतर्कैरनास्कंदनीयानिर्वि

श्रुतिविप्रतिपन्नातेयदास्थास्यतिनिश्चला॥समाधावचलाबुद्धिस्तदायोगमवाप्स्यसि॥५३॥

विकित्सापरोक्षनिश्चयवतीभूत्वासमाधौनिर्विकल्पेकप्रत्यगात्मनिअचलालयविक्षेपशून्यास्थास्य तिस्थिराभविष्यतितदायोगंविवेकप्रज्ञांप्राप्स्यसिनिश्चलसमाधिलाभएवबुद्धिप्रसादलिंगमितिभा वः॥५३॥श्रीरामकृष्णवासुदेवायनमः॥

॥१४०॥

लब्धसमाधेःस्थितप्रज्ञापरनाम्नोलक्षणानिबुभुत्सुरर्जुनउवाचस्थितप्रज्ञस्येतिस्थिताप्रत्यगात्मनि प्रतिष्ठिताप्रज्ञायस्यतस्यस्थितप्रज्ञस्यसमाधिस्तस्यसमाधौस्थितस्यकाभाषाभाषणंवचनंक

अर्जुनउवाच॥स्थितप्रज्ञस्यकाभाषासमाधिस्थस्यकेशव॥स्थितधीःकिंप्रभाषेत किमासीतव्रजेतकिं॥५४॥

थमसौपरैर्भाष्यतेइत्येकःप्रश्नःस्थितधीःस्थितप्रज्ञःअर्थाद्युक्तितःमनूक्तिंप्रभाषेकथंवदतिक थमास्तेकथंवाव्रजतिविषयान्भुंक्तेइतिप्रश्नत्रयं॥५४॥श्रीरामकृष्णवासुदेवायनमः॥श्रीः॥

एतेषांक्रमेणउत्तराण्याह भगवान्प्रजहातीत्यादिनाअत्रयान्येवकृतार्थलक्षणानितानिज्ञानसाध
नानीतिमत्वाउपदिश्यंतेस्थितप्रज्ञलक्षणानितेषांकृतार्थेषुयत्नसाध्यत्वान्नकृतार्थेषुस्वाभाविकता
न्यथोक्तं॥उत्पन्नात्मप्रबोध्यस्यह्येदृष्टत्वादयोगुणाःभवंत्ययत्नतस्तस्यनतुसाधकरूपिण॥

श्रीभगवानुवाच॥ प्रजहातियदाकामान्सर्वान्पार्थमनो
गतान्॥आत्मन्येवात्मनातुष्टःस्थितप्रज्ञस्तदोच्यते॥५५॥

इतियदायंयोगीसर्वान्स्थूलसूक्ष्मकारणशरीरभोग्यान्कामान्काम्यमानान्विषयान्प्रकर्षे
णसमूलंजहातित्यजतिकीदृशान्कामान्मनोगतान्मनस्यवसंकल्पविकल्पात्मकेस्थितान्
नतुबहिःयथोक्तमक्षपादावार्यैःदोषनिमित्तंरूपादयोविषयाःसंकल्पकृताइतितत्रस्थूलानां

कामानांत्यागएकांतसेवनमात्राङ्गवतीतिसस्थवीयानेवविलीनकरणग्रामस्यसामनस्कस्य
जाग्रद्वासनामयाःस्वप्नेयेकामाःस्फुरंतितेषामपित्यागोभगवंतध्यानादिरूपसद्वासनाभ्यास वे
बलेनभवतियेतूपसंहृतकरणस्यसंप्रज्ञातसमाधिकालेदिव्याःकामाःसंकल्पमात्रोपनताः
दहरविद्यादिषुप्रसिद्धास्तेषामपित्यागोऽसंप्रज्ञातसमाध्यभ्यासबलेनभवतिएवंत्रिविधान्
कामान्त्यक्त्वाआत्मन्येवास्वंडेकरसेआत्मनास्वेनैवस्वरूपानंदेनतुष्टःबाह्यविषयनिरपे
क्षोयदाभवतितदायंस्थितप्रज्ञइत्युच्यते॥५५॥ श्रीरामकृष्णवासुदेवायनमः॥ श्रीराम॥

दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः॥वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते॥५६

दुःखेषुत्रिविधेषुशारीरमानसागन्तुकेषुप्राप्तेष्वपिअनुद्विग्नमनाअचंचलमनाःवक्ष्यतिच यस्मि
स्थितोनदुःखेनगुरुणापिविचाल्यतइतिसुखेसुखसाधनेषुस्त्रक्चंदनादिषुप्राप्तेष्वपिविगत

दुःखेष्वनुद्विग्नमनाःसुखेषुविगतस्पृहः॥वीतरागभयक्रोधःस्थितधीर्मुनिरुच्यते॥५६

स्पृहानिवृत्तिकत्वाद्भवति।अतएववीताःरागभयक्रोधायस्मात्सतथानहियस्मामवस्था
यांरागादयोदुःखादयोवासंभवंतिएवंविधःसमाधिस्थःस्थितधीःस्थितप्रज्ञउच्यते॥५६॥ ॥१४२॥

स्थितधीःकिंप्रभाषतत्यस्योत्तरमाहयःसर्वत्रेति।सर्वेषुधनदारदेहजीवनादिषुअनभिस्नेहः
अभिस्नेहवाद्धिधनदारादिषुक्लिष्टेषुसकलेषुवाहमेवविकलःसकलोस्मीतिदैन्यदर्पेपि

यःसर्वत्रानभिस्नेहस्तत्तत्प्राप्यशुभाशुभं॥नाभिनंदतिनद्वेष्टितस्यप्रज्ञाप्रतिष्ठिता॥५७॥

नःपूर्वापरानुसंधानरहितोजल्पतिअयंतुननथेतिभावःतथाशुभंप्राप्यनाभिनंदतिसंतुष्ट
भूत्वाशुभप्रापयितारंनप्रत्यसूयतियथाअशुभंप्राप्यनद्वेष्टिदुःखीभूत्वाअशुभप्रापयिता
रंनानिंदतियःतस्यप्रज्ञाप्रतिष्ठिता॥५७॥ श्रीरामकृष्ण॥

किमासीतेत्यस्योत्तरमाहयदिति।इंद्रियार्थेभ्यःशब्दादिविषयेभ्यःप्रारब्धकर्मवशान्नव्युत्थितो

यदासंहरतेचायंकूर्मोंगानीवसर्वशः॥इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता॥५८॥

॥१४३॥

पियोगादेतदर्थंनादुद्विग्नःसन्निरोधसंस्कारप्राबल्यात्प्रीत्यासमाधिमनुतिष्ठन्नेवास्तेइत्यर्थः॥५८

ननुविषयेभ्यइंद्रियाणांनिवृत्तिश्चेत्स्थितप्रज्ञतोहेतुस्तर्हिसुप्तिमूर्छालयप्रबोधादावपिसास्तीति

सर्वोपिस्थितप्रज्ञःस्यादेवंत्याज्यंकयाहविषयाइतिसत्यंदेहिनोदेहाभिमानवतोमूढस्यसुप्त्यादौनिहारस्य

इंद्रियैर्विषयाननाहरतोअभुंजानस्यविषयाःविनिवर्त्तंतएवनतथापिरसवर्जंरसोरागस्तद्वर्जंनिवर्त्ततेन

तापिसूक्ष्मरूपेणरागोस्तिनिरागमूलस्यात्मज्ञानस्यादाहान्नासौस्थितप्रज्ञइत्यर्थःअस्यैवपुनःपरंद

विषयाविनिवर्त्ततेनिराहारस्येदेहिनः॥रसवर्जंरसोप्यस्यपरंदृष्ट्वानिवर्त्तते॥५९॥

ष्ट्वाआत्मानंसाक्षात्कृत्यानिराहारस्यशब्दादीनअगृह्णतःरसोपिनिवर्त्तते।मूलाज्ञानदाहादितिअ

स्तिसुप्तादेस्समाधिस्थस्यमहान्विशेषइतिभावःप्रारब्धस्तुरोगिणःकाष्ठतपस्विनोवामूढस्यापिवि

षयाननाहरतोरसवर्जंविषयाविनिवर्त्तंते।नस्यैवपरंदृष्ट्वास्थितस्यरसोपिनिवर्त्ततइतिवाव्याख्यः५९॥

किंचत्सुप्तोदरिंद्रियाणिभ्रांत्यास्वयमेवलीयंतेसमाहितेनतुतानिकूर्मेणांगानीवस्वेच्छयासंक्षीयंते
एतच्चात्यंतायासमाध्यमित्याहयततइति॥विपश्चितःशास्त्रावार्यापदेशवतोयततोपिसमाधिसि

यततोह्यपिकौंतेयपुरुषस्यविपश्चितः॥इंद्रियाणिप्रमाथीनिहरंतिप्रसभंमनः॥६०॥

ध्यर्थंयतमानस्यापिपुरुषस्यप्रमथ्यस्येंद्रियाणिकर्तृणिमनःप्रतीपस्थिरीक्रियमाणंकर्मीभूतं
हरंतिविषयप्रवणंकुर्वंति।यतःप्रमाथीनियथाबहवश्चोरावनेएकंपुरुषंप्रमथ्यतस्यवित्तंह
रंतिएवंइंद्रियाणियततोमनोहरंतियतःप्रसभमनिच्छतोयेनप्रमथनशीलानि॥६०॥ श्रीराम॥

अ०२५
गी०२

॥१४४॥

यद्यप्येवंतथापितानिनियंतव्यान्येवान्यथास्थितप्रज्ञत्वस्यैवासिद्धेरित्याहतानीति।संयम्यव
शीकृत्ययुक्तःसन्नद्धःमत्परःअहमेवसर्वेषांप्रत्यगात्मापरःस्त्र्यादिभ्योबाह्येभ्योदेहेंद्रियादि

तानिसर्वाणिसंयम्ययुक्तआसीतमत्परः॥
वशेहियस्येंद्रियाणितस्यप्रज्ञाप्रतिष्ठिता॥६१

प्यअंतरेप्यश्चउत्कृष्टःप्रियतमःयस्यसमत्परःसन्नान्यंतहियस्मात्वशेआज्ञायांशेषंस्पष्टं।६१॥

यदापंचावतिष्ठंतेज्ञानानिमनसासह बुद्धिश्चनविचेष्टतितामाहुःपरमांगतिमितिश्रुतौइंद्रियमनोबुद्धीनांनि
ग्रहेपरमपरप्राप्तिरियुक्तं तत्रउपसंहृतकरणस्यबाह्यतन्नाद्दादीनगृह्णतोमनोमात्रेणावस्थितस्ययो
गिनःमनसोअनिग्रहेकिंस्यादित्याहध्यायतइतिद्वाभ्यांविषयान्नाद्दादीन्ध्यायतश्चिंतयतःपुंसःपु

ध्यायतोविषयान्पुंसःसंगस्तेषूपजायते॥संगात्संजायतेकामःकामःक्रोधोभिजायते॥६२

नुषस्यतेषुनाद्दादिषुसंगःसंबंधोजायतेबाह्यार्थेभ्योनिगृहीतान्यपिइंद्रियाणिमनोदोषात्तुनर्बाह्यो
र्थान्गृह्णंतीत्यर्थःततःसंगात्कामःतस्मिन्विषयेअभिलाषःसंजायतेकामात्कुतश्चिद्धेतोःप्रतिहतादभिज्वलनात्मात्क्रोधोभिजायते॥६२॥श्रीरामकृष्णवासुदेवायनमः॥ ॥१४५॥

ततःक्रोधात्संमोहःकार्याकार्यविवेकाभावोभवति ततःस्मृतिविभ्रमःशास्त्रार्थोतुसंधानस्यविभ्रं
शारूपंवलनंभवति स्मृतिभ्रंशात्बुद्धिनाशःशास्त्रार्थस्यनिश्चितस्यापितिरोधानंभवति तस्मिं

क्रोधाद्भवतिसंमोहःसम्मोहात्स्मृतिविभ्रमः॥स्मृति
भ्रंशाद्बुद्धिनाशोबुद्धिनाशात्प्रणश्यति॥६३॥

अशास्त्रज्ञेपरोक्षज्ञानेपिनष्टपुरुषोनश्यतिपुरुषार्थायोग्योभवतियोहितारहितःसनष्टएवेति
लोकेवदंति॥६३॥श्रीरामकृष्णवासुदेवायनमः॥

ननुविषयान्अध्यायतोपियोगिनोव्युत्थानेप्रमाणस्वाभाव्यादिंद्रियाणांविषयेषुसंगोदुष्परिहरस्तत
श्चोत्करीत्यातस्यापिनाशप्रसक्तिरित्याशंक्याहरागद्वेषेति विधेयात्माकिंकरीकृतमनास्तुआत्मवश्ये
मनोधीनैरिंद्रियैःस्वाधिनश्चित्तस्यकिंकरीकृतस्यकामक्रोधहीनत्वात्स्वयमपिरागद्वेषवियुक्तैः

रागद्वेषवियुक्तैस्तुविषयानिंद्रियैश्चरन् ।।आत्मवश्यैर्विधेयात्माप्रसादमधिगच्छति॥६४

विषयान्पथिपतितृणादीनिवानास्थयाचरन्पश्यन्नपिपुमान्तत्रकामाद्यनुदयात्प्रसादंसंक
ल्पविकल्पकंपलेपप्रक्षालनेनमनसःस्वाच्छंअधिगच्छतिमनसःस्वाच्छ्यमेवप्रत्यगात्मनःस्वाच्छंतस्य
तद्गुणसारत्वात् अजितमनस्कमिवजितमनस्कंविषयसंगोनबाधतेतोमनोजयोवश्यंकर्तव्यइत्यर्थः६४॥

॥१४६॥

किंचचित्तस्यप्रसादेहिअस्यपुंसःसर्वदुःखानांकाममूलकानांकामाभावात्हानिःपरिहारोजाय
तेकामानुदयेहेतुमाहप्रसन्नेतिहियस्मात्प्रसन्नचेतसःपुंसोबुद्धिर्ब्रह्मात्मैक्यनिश्चयःआ

प्रसादेसर्वदुःखानांहानिरस्योपजायते ॥
प्रसन्नचेतसोह्याशुबुद्धिःपर्यवतिष्ठते ॥६५॥

शुन्नीघ्रंपर्यवतिष्ठतेसुदृढोभवतितस्मिंश्चसतिप्राप्याभावान्नकामोदयइत्यर्थः॥६५॥श्रीः॥

समनस्कानामिंद्रियाणामनियहेदोषउक्तःबुद्धेरपर्यवस्थानेकोदोषइत्यतआह नास्तीति।अयुक्तस्यश्रवण
मननयोरनासक्तस्यबुद्धिर्ब्रह्मात्मैक्यनिश्चयोनास्तिप्रमाणविषयासंभावनायाःप्रमेयविषयासंभावनाया
श्चानिरासात्तथाअयुक्तस्यअसमाहितमनसःभावनाब्रह्मकारांतःकरणवृत्तिप्रवाहोनास्तिमनसश्चांच

नास्तिबुद्धिरयुक्तस्यनचायुक्तस्यभावना॥नचाभावयतःशांतिरशांतस्यकुतःसुखं॥६६

त्येनबुद्धिरपिचांचल्यात्अभावयतोध्यानमकुर्वतःशांतिःसुखंदुःखापरमश्चनास्तिचेतसोऽनवस्थित
त्वेनदुःखावश्यंभावात्अशांतस्यानुपरतसर्वदुःखस्यसुखंप्रत्यगद्वयानंदात्मकंकुतःनकुतःश्चित्दुः ॥१४७॥
खित्वादेवआद्यंअयुक्तस्येतिपदंयुञ्जियेगइत्यस्यरूपंद्वितीययुजसमाधावित्यस्यतस्माद्बुद्धेःपर्यवस्थानमावश्यकं॥६६

तदभावेदोषमाहइंद्रियाणांहीति।हियस्मात्इंद्रियाणांचरतांस्वस्वविषयेप्रवर्त्तमानानांकर्मणि
षष्ठि यत्रागादिकलुषितंमनःतान्यनुलक्ष्मीकृत्यविधीयतेप्रत्येतेकर्मकर्त्तरिलकारःप्रवर्त्ततइत्य
र्थःतत्इंद्रियानुसारिमनःअस्यसाधकस्यप्रज्ञांआत्मतत्वविषयांबुद्धिंहरतितस्याःमनोनुसारित्वात्

इंद्रियाणांहिचरतांयन्मनोनुविधीयते॥तदस्यहरतिप्रज्ञांवायुर्नावमिवांभसि॥६७॥

दृष्टांतंस्पष्टार्थःअन्येतुइंद्रियाणांमध्येयदिंद्रियमनुलक्ष्मीकृत्यमनःप्रवर्त्ततेतदिंद्रियंअस्यसाध
कस्यमनसोवाप्रज्ञांहरतीतियोजयंतिआत्मविषयांप्रज्ञांहृत्वामनोविषयविषयांकरोतीतिभा
ष्यमप्यालोचनीयं॥६७॥ श्रीरामकृष्णवासुदेवायनमः॥

यततोह्यपीत्यत्रोपक्रांतमर्थंबुद्ध्याउपपाद्यउपसंहरति तस्मादितियस्मादिंद्रियाधीनंमनोमनोनु
गावप्रज्ञातस्मात्हेमहाबाहोयस्ययेतेःइंद्रियाणिसर्वशः सर्वप्रकारेणस्वकारणेनमनसासहि

तस्माद्यस्यमहाबाहोनिगृहीतानिसर्वशः॥
इंद्रियाणींद्रियार्थेभ्यस्तस्यप्रज्ञाप्रतिष्ठिता॥६८॥

तानीतियावत्इंद्रियार्थेभ्यःशब्दादिगृहीतानिभवंतितस्यप्रज्ञाप्रतिष्ठितनिविद्धि॥६८॥श्रीराम॥ ॥१४८॥

यदापंचावतिष्ठंतइत्युदाहृतश्रुतेःतामाहुःपरमांगतिमित्येतंचतुर्थपादंव्याचष्टे।यानिशेति।सर्वेषांभूताना
मज्ञानांयानिशेवनिशायस्यांमध्यंदिनउलूकाइवानंधाअपंधाएवसर्वेप्राणिनोभवंतितस्यांतस्मि
न्प्रत्यग्ज्योतिषिसंयमीइंद्रियमनोबुद्धीनांनिग्रहणशीलोयोगीजागर्तिइंद्रियादीनांदृक्शक्तिलोपेपि

यानिशासर्वभूतानांतस्यांजागर्तिसंयमी॥यस्यांजाग्रतिभूतानिसानिशापश्यतेमुनेः॥६९

अनुपरतिदृक्शक्तिरेवास्तितथाचश्रुतिःनहिद्रष्टुर्दृष्टेर्विपरिलोपोविद्यतेऽविनाशित्वादितियस्यामवि
द्यायांक्रियाकारकादिदृश्यप्रपंचिकायांसर्वाणिभूतानिजाग्रतिनिद्रीथेउलूकाइवस्वस्वच्छा
पोप्रपंचंनैसाअविद्यापश्यतोमुनेःआत्मदर्शनवतोयोगिनःप्रारब्धकर्मणाविदेहकैवल्यप्रतिबंधा

तूलेनातोऽनुवर्त्तमानाव्युत्थानकालेव्यवहरतोस्यगारंधरकारवतीनिश्चेवकूत्रा करीभवति अति
कुसुमाराहियोगिनःबाह्यव्यवहारादुद्विजंतेनराइवगारंधकारंसंसारंतथोक्तंयोगभाष्येअक्षि
मात्रकल्पोहिविद्वानल्पदुःखलेशेनाप्युद्विजतइति।अत्रवार्त्तिकामि।कारकव्यवहारेहिशुद्धंवस्तु
नदृश्यते॥शुद्धवस्तुनिसिद्धेवकारकव्याकृतिस्तथा॥काकोलूकनिशेवायंसंसाराऽज्ञात्मवेदिनः॥
यानिशासर्वभूतानांदित्यवाक्यंहरिरितिबुद्धतत्वस्यलोकायंजडोन्मत्तपिशाचवत्बुद्धतत्वा
पिलोकस्यजडोन्मत्तपिशाचवदिति।तदेवंकिमासीतेत्यस्योत्तरंयदासंहरतेचायमित्यादिनाएतद्
तेनग्रंथेनस्थितप्रज्ञःसदासमाधिमनुतिष्ठन्परमांगतिप्राप्यास्तद्युक्तं॥६९॥श्रीरामकृष्णहरिः॥ ॥१४९॥

ननुप्रजहातियदाकामान्इंद्रियाणींद्रियार्थेभ्योनिगृहीतानीत्यादिनाऽसकृत्विषयाणांप्रहाणंतेभ्यश्च
इंद्रियादीनांप्रत्याहरणमुक्तंतेनतेषामात्मतःपृथक्सत्वमस्तीतिसिद्धं नन्वनेहनानास्तिकिंचनेत्यादि
श्रुतातेषांबाधान्नतदस्तीतिवाच्यंइहेतिप्रतीत्यैवतन्निषेधात्नहिइहभूतलेघटोनास्तीत्युक्तेघटस्य

आपूर्यमाणमचलप्रतिष्ठंसमुद्रमापःप्रविशंतियद्वत्॥तद्वत्कामा
यंप्रविशंतिसर्वेसशांतिमाप्नोतिनकामकामी॥७०॥

स्वरूपंनिषिध्यतेकिंतुतस्यभूतलसंबंधमात्रंतस्मात्कामानांपृथक्सत्वमस्त्यतोनादृतासिद्धिरित्याशं
क्यसदृष्टांतंपरिहरतिआपूर्यमाणमिति॥प्रविशंतीभीरद्भिरापूर्यमाणमपिअचलप्रतिष्ठंअनुद्विक्तंवृद्धि
हीनत्वात्एवंनिर्गच्छंतीभिरद्भिरित्यमानमपिअचलप्रतिष्ठंअरिक्तंक्षासहीनत्वादित्यपिबोध्यंएवंविधं

समुद्रंयद्वत्आत्मप्रभवाआपःप्रविशंतितद्वत्यंपुरुषंकामेरापूर्यमाणंहीयमानंवाअचलप्रतिष्ठं
निर्विकारंबुद्धिद्वयसहीनत्वात्आत्मप्रभावाःसर्वेकामाःप्रविशंतिसएवशांतिंमोक्षंआत्यंतिकंदुः
खोपरमंप्राप्नोति नतुकामकामीविषयार्थीअयंभावःकूटस्थादात्मनःसर्वस्यउत्पत्तिस्तत्रैवबल
यतिसर्वश्रुतिस्मृतिप्रसिद्धं तेनकामानांप्रहाणंतेभ्यश्चेंद्रियाणांप्रत्याहरणंस्मर्यमाणंनतेषां
परमार्थतःपृथक्सत्वंसाधयतिबहुप्रमाणविरोधात्किंतुपामरप्रसिद्धंपृथक्सत्वमपिप्रत्य
ग्रहाणादिकमुक्तंप्रविलापनत्वेनैवव्याख्ययंयथाग्नयेपथिकृतेष्टकपालंनिर्वपेदित्योदौनिर्व
पतिनायागउच्यते नतुश्रौतार्थमात्रंतद्वदिहापिज्ञेयंनेहनानास्तीत्यपिदृहपरिदृश्यमानप्रपं ॥१५०॥

वेआत्मातिरिक्तंनानाकिमपिनास्तीत्येवंपरतयाव्याख्येयंतथाचआत्मैवेदंसर्वंब्रह्मैवेदंसर्वं
सर्वंखल्विदंब्रह्मेत्यादयःश्रुतिवादाःसंगच्छतेआत्मनिकल्पितस्यास्यतत्रैवनिषेधेनान्यत्र
सत्वानुपपत्तेर्नकामानांपृथक्सत्वमस्तीतियुक्तएवसमुद्रदृष्टांतःयत्तुसमुद्रात्पृथग्गंगायाः
सत्वमस्तीतितन्नकार्यकारणसत्तानिरिक्तसत्तायाअभावात्वाचारंभणंविकारोनामधेय
मितिकार्यस्यवाग्गलंबनंमात्रत्वश्रवणादित्यन्यत्रविस्तरः॥७०॥ श्रीरामकृष्णवासुदेव॥

प्रासंगिकीमात्रांकांपरिहृत्यव्रजेतकिमित्यस्यप्रश्नस्योत्तरमाहविहायेति॥पूर्वोक्तान्त्रिविधान्कामान्विहा
यचरतिविषयान्भुंक्तेनिस्पृहश्चपतानिर्ममःममतावान्नहिइदंममभूयादित्यन्यधनाद्यर्थंस्पृहांकरोति निर्मे
मोपिकुतःयतोनिरहंकारःनह्यहंकारशून्यस्यसुखादोमनाद्दृष्टानस्माद्दहंकारप्रविलयात्तुशांतिंमोक्षंप्रा

विहायकामान्यःसर्वान्पुमांश्चरतिनिस्पृहः॥निर्ममोनिरहंकारःसशांतिमधिगच्छति॥

७१॥

प्नोतियेत्रयःसर्वत्रानपिस्नेहइतिसर्वत्रयच्छब्दस्योत्तरत्रसाधनविधिपरएवायंग्रंथःअन्यथास्थितप्र
ज्ञस्यप्रकृतत्वात्तदनुवादार्थंयच्छब्दानर्थःकथंप्राप्नोतिलोकेपिहिपरस्वभावकथनंसएवकरोतीतित
च्छब्दएवप्रयुज्यतेनतुयच्छब्दःविधौतुयएवंकरोतीतिसइदंप्राप्नोतीतिद्वयोरपिप्रयोगोदृश्यतेलक्षण
कथनार्थत्वेपितत्रतात्पर्याभावाद्विधाएवपर्यवस्यतीतिदिक्॥७१॥ श्रीराम॥

प्रतिपादितंकर्मयोगप्राप्यांसांख्यनिष्ठांफलेनस्तुवन्नुपसंहरतिएषेति॥एषास्थितप्रज्ञलक्षणप्रसंगात्
कथिताब्राह्मीब्रह्मप्राप्तेत्रब्रह्मविदुच्यतेब्रह्मविद्वैसवभवतीतिश्रुतेःतस्यैयंब्राह्मीस्थितिःनिष्ठैएनांनिष्ठां
प्राप्यनैनांविमुह्यतिपुनर्मोहंनप्राप्नोति अस्यांअंतकालेपिस्थित्वेतिसकृज्ज्ञातापीयंफलवतीनत्वासा

एषाब्राह्मीस्थितिःपार्थनैनांप्राप्यविमुह्यति॥स्थित्वास्यामंतकालेपिब्रह्मनिर्वाणमृच्छति॥
इतिश्रीभगवद्गीतासूप०श्रीकृष्णार्जुनसंवादेसांख्ययोगभीष्मपर्वणिपंचविंशोध्यायः॥२५॥

नावच्चिराभ्याससापेक्षत्वंकं ब्रह्मऋच्छतिप्राप्नोति किंलोकांतरवत्गतिप्राप्यब्रह्मनेत्याहनिर्वाणमितिनि
र्गतंवानंगमनंयस्मिन्प्राप्यब्रह्मणितन्निर्वाणं तथाचश्रुतिःनतस्यप्राणाउत्क्रामंत्यत्रैवसमवनीयंतेब्रह्मैव
सन्ब्रह्माप्येतीतिगतिमंतरेणप्राणरूपोपाधिप्रविलयमात्रात्घटाकाशस्यमहाकाशत्वप्राप्तिवत्जीव

स्यब्रह्मप्राप्तिमाहअंतकालेपीत्यपिशब्दात्यो ब्रह्मवर्योदारभ्यात्रतिष्ठतिसब्रह्मनिर्वाणंकैमुति
कन्यायेनप्राप्नोतीतिगम्यते अस्याध्यायस्यार्थःसंगृहीतोमधूसूदनश्रीपादैःज्ञातंतत्साधनंक
र्मसत्वशुद्धिश्चतत्फलंतत्फलंज्ञाननिष्ठेवेत्यध्यायेस्मिन्प्रकीर्तितं॥७२॥इतिश्रीमत्पदवाक्य
प्रमाणम्मोदाधुरंधरचतुर्थीवंशावतंसश्रीगोविंदसूरिसूनोःश्रीनीलकंठस्यकृतौभारत
भावदीपेभीष्मपर्वणिभगवद्गीतार्थप्रकाशेद्वितीयोध्यायः॥ ७॥ ॥७१॥ ॥५

॥१५२॥

पूर्वस्मिन्नध्यायेएषातेभिहितासांख्येबुद्धियोगेत्विमांशृण्वितिद्वेबुद्धीप्रदर्श्यव्यवसायात्मिकाबुद्धिरि
तिश्लोकेनसांख्यनिष्ठावतापातञ्जलानास्तिकर्मयोगनिष्ठावतांतुसास्तीत्युक्तायावानर्थउदपा
नेइतिसांख्यनिष्ठायांसर्वकर्मफलोतभावित्रवणात्तोमवप्रत्यात्मिकांस्वाध्यायानुकूलांमन्वानोर्जु

अर्जुनउवाच॥ज्यायसीचेत्कर्मणस्तेमताबुद्धिर्जनार्दन॥
तत्किंकर्मणिघोरेमांनियोजयसिकेशव॥१॥

नउवाच॥ज्यायसीतिहेजनार्दनकर्मणोनिष्कामकर्मयोगापेक्षयाबुद्धिःसांख्यनिष्ठालक्षणंज्ञानं
ज्यायसीप्रशस्ततरावेत्तेतवमतान्तर्हिमांभैक्ष्यवृत्त्यापितुष्यंतंघोरेंध्रुवेधात्यकर्मणिकिंकु
तोहेतोर्नियोजयसिपुनःपुनर्युध्यस्वेतिवदन्॥१॥श्रीरामकृष्णवासुदेवायनमः॥

तनुतत्त्वज्ञाननिष्ठायामनधिकारात्कर्मैवकुर्वितिनाब्रवीमीत्याशंक्याहव्यामिश्रेणेति व्यामिश्रेण
अविविक्तेनइवशब्दोविविक्तेपिबुद्धिदोषादविविक्तोगृह्णातीतिसूचयतितेनवाक्येनत्रैगुण्यविष
यावदानिस्त्रैगुण्याभवार्जुनेतिकविदूदनिष्ठांत्याजयमिकर्मण्येवाधिकारस्तइतितामववग्राहय
मितथानिर्दूदोनित्यसत्त्वस्थोनिर्योगक्षेमआत्मवान्।भवतिवनिवृत्तिमार्गउपदिशामिधर्म्याद्धि

व्यामिश्रेणववाक्येनबुद्धिंमोहयसीवमे॥तदेकंवदनिश्चित्ययेनश्रेयोहवाप्नुयां॥२॥

युद्धात्श्रेयोन्यत्क्षत्रियस्यनविद्यतइतिप्रवृत्तिमप्युपदिशामिनह्येकेनमयायुगपदुभयंस्थिति ॥१५३॥
गतिवदनुष्ठातुंशक्यंअतोममबुद्धिंमोहयसीववस्तुतस्तुममोहंनाशयितुंप्रवृत्तोसीतिद्रवन्
द्दनोच्यते तन्नयोर्मध्येयदेकंप्रधानंमद्योग्यंततन्निश्चित्यवदयेनानुतिष्ठतेनाहंश्रेयःकल्याणंआप्नुयां॥२॥

अत्रोत्तरंश्रीभगवानुवाच॥लोकेस्मिन्निति।पुरापूर्वाध्यायेमयानिष्ठाएकेवप्रोक्तापरंतुसाद्विविधाद्विप्रका
राएकस्याएवब्रह्मनिष्ठायाःप्रकारद्वयमुक्तंअधिकारिभेदेननुब्रह्मप्राप्तयेपरस्परानिरपेक्षमार्गद्वय
मुक्तमितिभावःहेनघविशुद्धांतःकरणमद्वनस्यार्थेसम्यगालोचयेत्यर्थःतेदवप्रकारद्वयमाहज्ञानयो

श्रीभगवानुवाच॥लोकेस्मिन्द्विविधानिष्ठापुराप्रोक्तामयानघ॥
ज्ञानयोगेनसांख्यानांकर्मयोगेनयोगिनां॥३॥

गेनेतिसांख्यानांप्रकृतिपुरुषयोर्विविक्तत्वंजानतांआत्मनानात्मविवेकज्ञानवतांज्ञानार्थंयुज्यतेइतिज्ञा
नयोगःज्ञानोपायोवेदांतश्रवणमननिदिध्यासनात्मकस्तेनज्ञानयोगेनब्रह्मणिनिष्ठांपरिसमाप्तिं
संख्याःप्राप्नुवंतीत्यर्थःयोगिनांसिध्यसिध्योःसमोभूत्वासमत्वंयोगउच्यतइतिउक्तलक्षणयोगवतांकर्मे

योगेन सांख्योपासनादिनिर्विकल्पकसमाध्यनुष्ठानांतमिहकर्मयोगपदार्थः तेनयोगिनोब्रह्मनिष्ठांप्रा
पुवंतीत्यर्थः अयंभावः इहजन्मनिजन्मांतरेवाईश्वरप्रीत्यर्थमनुष्ठितैः कर्मभिर्विशुद्धसत्वोविवेकवै
रा ग्यत्रयादिषट्कोपेतोमुमुक्षुः प्रत्यक्प्रवणचित्तः श्रवणमननाभ्यामवकृतत्योभवति सचेत्श्रवणा
देः प्रागसमाहितचित्तस्तर्हिनिदिध्यासनमस्योपक्षितंअतएवसह कार्यंतरविधिः पक्षेणेतिसूत्रक
तानिदिध्यासनस्यपाक्षिकत्वमुक्तंसोयंसांख्यमार्गः तथासर्वाणिकर्माणिपरमगुरावर्पयन्श्रवण
मननात्मकंविचारमंतरेणैवकेवलश्राद्धमात्रान्प्रतीवानिर्विण्णोषब्रह्मरूपत्वंगुरुवाक्येतोनिश्चित्यासं ॥१५४॥
भावनादिदोषरहितआचार्योन्निर्गुणब्रह्मोपास्तिप्रकारमधिगम्यकर्मच्छिद्रेषुसमाध्यभ्यासंकुर्वन्

निष्कलप्रत्यगात्मस्वरूपंसाक्षात्करोतिसोयंयोगमार्गः तेनऊहापोहकौशलंयेषामस्तितेसांख्याः येषां
२ तन्नास्तिमेयोगिनइति अतअयंद्विप्रकारानिष्ठानतुद्विनिष्ठइतिभ्रमितव्यंयथोक्तंवसिष्ठेन। द्वौक्र
मौचित्तनाशस्ययोगोज्ञानंराघव॥योगोवृत्तिनिरोधोहिज्ञानंसम्यगवेक्षणं॥असाध्यःकस्यचि
त्तत्वनिश्चयःप्रकारोद्यौततोदेवोजगादपरमःशिवइतिचित्तादर्शनोपलक्षितस्यब्रह्मसाक्षात्कारस्य
द्वौक्रमौचित्तादिर्मिथ्यात्वपक्षेज्ञानमवयथारज्जूरगासम्यगवेक्षणेनैवनश्यतितद्वत्तस्यसत्वपक्षे
योगएवयथासत्यउरगःमंत्रादिनानिरुद्धाप्रचारःस्वयमेवनश्यतितद्वच्चित्तमपियोगेननिरुध्यमा
नंनश्यतितस्यनिरन्वयोच्छेदस्तुप्रारब्धकर्मनेतेपक्षद्वयेपितुल्यइति॥३॥श्रीरामकृष्णवासुदेव॥

अनयोःप्रकारयोरंगांगिभावमाह नकर्मणामिति॥कर्माणांयज्ञानोद्दीअनारंभात्अननुष्ठानात्
नैष्कर्म्यज्ञाननिष्ठांनाश्नुतेनप्राप्नोति विविदिषंतियज्ञेनेतिश्रुत्यायाज्ञादीनांविद्यांगत्वेनविधानात्
ननुसन्न्यत्ययप्राधान्यात्कर्मणांविविदिषांगत्वमत्रगम्यते तेनविविदिषायांयज्ञादिनासिद्धायांएतम

नकर्मणामनारंभान्नैष्कर्म्यपुरुषोश्नुते॥नचसंन्यसनादेवसिद्धिंसमधिगच्छति॥४॥

प्रव्राजिनोलोकमिच्छंतःप्रव्रंतीतिश्रुतेःप्रव्रज्यारूपमेवनैष्कर्म्यमिहज्ञाननिष्ठासाधनंग्राह्यंनज्ञानं
नैष्कर्म्यसिद्धिंपरमामित्यादावित्रतङ्ग्राहकस्यपरमत्वविशेषणस्याभावात्।नचकर्मयोगजनित
चित्तशुध्यभावेकेवलात्संन्यासात्सिद्धिंसमधिगच्छतीतियोजनायांविकृष्टयोर्ज्ञानकर्मणोःसमुच्च ॥१५५॥
यासंभवस्याभीष्टस्यसिद्धेःकिमितिनैष्कर्म्यशब्देनज्ञाननिष्ठागृह्यतइतिचेत्सत्यंगुणेःकर्मकार्यतइ

तिवाक्यशेषान्नैर्गुण्यहेतुकंमुख्यंज्ञानमेवेहनैष्कर्म्यपदार्थःनतुप्रव्रज्याविविदिषंतियज्ञेनेत्यत्रापिजिगमि
षत्यश्वेनतिघांसत्यग्निनेत्यादाविवतृतीयांतस्यधात्वर्थेनैवान्वयात्अश्वादीनांगमनादाविवयज्ञादी
नांवेदनएवान्वयोज्ञेयःएतमेवंतिश्रुतिस्तुविविदिषासंन्यासाभिप्रायेणप्रवृत्ताएतंवेतमात्मानंविदित्वा
ब्राह्मणाःपुत्रैषणायाश्चवित्तैषणायाश्चलोकैषणायाश्चव्युत्थायाथभिक्षाचर्यंचरंतीतिज्ञानप
रिपाकार्थस्यजीवन्मुक्तिसुखार्थस्यवायाज्ञवल्क्यादिभिरनुष्ठितस्यविद्वत्संन्यासस्यापिप्रागात्मवेद
नात्असन्यासिनोज्ञानमेवनोत्पद्यतइतिप्रत्यवमार्ग्रहोविक्षेपककर्मत्यागरूपसंन्यासविषयः न
तुकाषायपरिधानमात्रविषयःनतुकाषायपरिधानमात्रविषयःगर्गीव्याघ्रवसिष्ठादीनामतथा
विधानामपिज्ञानोत्पत्त्यवगमादित्यास्तांतावत्कर्मभिरशोधितचित्तस्यमंदबुद्धेःरागद्वेषादिग्र

स्तस्यआत्मानात्मविवेकद्वारावानैष्कर्म्यप्राप्तिनास्तीतिपूर्वार्धार्थः नन्वभयंसर्वभूतेभ्योदत्वा
नैष्कर्म्यमाचरेदितिकेवलात्कर्मसंन्यासादपिनैष्कर्म्यसिद्धिःस्मर्यतेतत्कथमुच्यतेनकर्मणाम
नारंभान्नैष्कर्म्यमश्नुतीतितत्राह नेवति॥ कर्मजवित्तशुद्ध्यभावेकृतादपिसंन्यासान्नमोक्षसिद्धिः
उदाहृतस्मृतिस्तुवित्तशुद्धिपूर्वकसंन्यासाभिप्रायोनहिरागादियस्तःसर्वभूतेभ्यःसर्वात्मना
भयंदातुमीष्टेऽतायुक्तमुक्तंनवसंन्यासनादवेति॥४॥ श्रीरामकृष्णवासुदेवायनमः॥

DR BHAU DAJI

एतदेवस्पष्टंवयतिनहीति॥अवशःकर्मजशुद्ध्यभावात्अजितचित्तःकश्चिदपिजातुकदा
चित्समाधिलक्षणमपिअकर्मकृत्कुर्मणिदुर्मनोरथादीनिअकुर्वन्हिप्रसिद्ध्

नहिकश्चित्क्षणमपिजातुतिष्ठत्यकर्मकृत्॥कार्यतेह्यवशःकर्मसर्वःप्रकृतिजैर्गुणैः॥५

नतिष्ठतिहियस्मात्सर्वोपिलोकःप्रकृतिजैर्गुणैःसत्वरजस्तमोभिःस्वभावप्रभवैःराग
द्वेषादिभिर्वाकर्मकायिकंवाचिकंमानसिकंवाकार्यतेवश्यंतत्रप्रवर्त्यते॥५॥श्रीराम॥

ननुसन्यासपूर्वकंध्यानेनैवचित्तशुद्धिमपिसंपादयिष्यामिकिंकर्मभिःरित्याशंक्याहकर्मेंद्रियाणीति
योविमूढात्मारागाद्याक्रांतचित्तःकर्मेंद्रियाणिवागादीनिसंयम्यनिगृह्यआस्तेएकांतेध्यानापदेशे
नोपविशतितस्यमिथ्याचारःतस्यतदासनादिकंआवरणंमिथ्याअलीकमेवनिष्फलत्वात्ततोहेतुःइंद्रि

कर्मेंद्रियाणिसंयम्ययआस्तेमनसास्मरन्॥इंद्रियार्थान्विमूढात्मामिथ्याचारःसउच्यते॥६॥

यार्थान्मनसास्मरन्निति।यतःइंद्रियार्थान्शब्दादीन्श्रोत्रादिभिर्गृह्णन्मनसास्मरतिअतो
मिथ्याचारःसविषयान्चिंतयन्भोगनिष्ठामात्मनोलोकेपिव्यनक्तिअतःकपटीत्यर्थःतस्मात्कर्मव्य
तिरिक्तश्चित्तशुद्ध्युपायोनास्तीतिभावः॥६॥श्रीरामकृष्णवासुदेवायनमः॥

यस्तुपूर्वस्मान्मिथ्याचारात्विलक्षणःपुरुषःधीरेयःइंद्रियाणिमनसासहनियम्यरागद्वेष
वियुक्तान्निरुत्याकर्मेंद्रियैःकर्मयोगंआरभतेहेअर्जुनसःकर्मफलैःस्वर्गादौऐहिकेवाशब्दादौ

यस्त्विंद्रियाणिमनसानियम्यारभतेऽर्जुन॥
कर्मेंद्रियैःकर्मयोगमसक्तःसविशिष्यते॥७॥

असक्तोनासक्तोविशिष्यतेपूर्वस्मादधिकोभवतीत्यर्थः॥७॥श्रीरामकृष्णवासुदेवायनमः॥

नियमंकुरुकर्मत्वंकर्मज्यायोह्यकर्मणः॥शरीरयात्रापिचतेनप्रसिध्येदकर्मणः॥८॥

नियममितियस्मादेवंतस्मात्त्वंनियतंसंध्योपासनादिकंकर्मकुरुयद्वानियतंनियमेनत्वंकर्मनित्यकाम्यसा धारणंयत्तापविनिवर्तकस्वभावंतदेवंकुरुहियस्मात्अकर्मणःसकलकर्मेंद्रियनिग्रहेणतदकारणात्चित्त जयशून्यात्कर्मैवज्यायःप्रशस्ततरंअपिचतेनतवक्षत्रियस्यअकर्मणःसत्यामपिचित्तशुद्धौसर्वकर्मत्यागिनः शरीरयात्रादेहव्यवहारःनप्रसिध्येत्भैक्ष्यवर्योयामनधिकारात्ब्राह्मणःपुत्रैषणायाश्चवित्तैषणायाश्च

व्युत्थाणाथभिक्षावर्यचरंतीतिसंन्यासविधायकेवाक्यराजासत्रंयेनस्वाराज्यकामोजयेतेत्यत्रराजपद वत्ब्राह्मणपदस्यविवक्षितस्वार्थत्वात्तत्रतावत्आश्रमाब्राह्मणस्यत्रयोराज्यन्यस्यद्वावैश्यस्यतिस्मृतश्च अन्यत्रापुत्रंपारिव्राज्यंकृत्यमुखजानामयंधर्मोविरुद्धंलिंगधारणंवाकुर्जातोरुजानानांनायंधर्मोविधीयतइति॥८

॥१५८॥

ननुकर्मणाबध्यतेजंतुरितिकर्मणांबंधकत्वस्मृतेःकथंमुमुक्षुंमांतत्रनियोजयसीत्याशंक्याहयज्ञा र्थादितियज्ञःपरमेश्वराराधनंयजेदेवपूजायामितिधात्वर्थानुगमात्तदर्थंयज्ञोवैविष्णुरितिस्मृतेः

यज्ञार्थात्कर्मणोन्यत्रलोकोयंकर्मबंधनः॥तदर्थंकर्मकौंतेयमुक्तसंगःसमाचर॥९॥

विष्णुर्वातदाराधनार्थंयत्कर्मततोन्यत्रकर्मणिस्वर्गाद्यर्थेप्रवृत्तोयंलोकःकर्मबंधनःकर्मणाबध्यतेनत्वी श्वराराधनार्थेनअतस्तदर्थंईश्वराराधनार्थंकर्मवर्णाश्रमोचितंहेकौंतेयमुक्तसंगःफलाभिलाषशून्यःसन् समाचरसम्यक्कुरु॥९॥ श्रीः॥

एतदेवार्थवादेनदृढयतिसहेतियज्ञैस्त्वंसहेतिसहयज्ञाःवोयमर्द्धनस्येतिपक्षेसोदरणाभावःकृमाधिकृ
नाइतियावत्प्रजास्त्वेवर्णिकाःअनेनयज्ञेनप्रसविष्यध्वंप्रसवोवृद्धिस्तांलभध्वंएषयज्ञवःयुष्माकं

सहयज्ञाःप्रजाःसृष्ट्वापुरोवाचप्रजापतिः॥अनेनप्रसविष्यध्वमेषवोस्त्विष्टकामधुक्॥१०
देवान्भावयतानेनतेदेवाभावयंतुवः॥परस्परंभावयंतःश्रेयःपरमवाप्स्यथ॥११॥

इष्टकामधुक्इष्टार्थपूरकोस्तु॥१०॥इष्टार्थपूरकत्वमेवाहदेवानितिभावयतत्तर्पयतअनेनदेवताप्
जात्मकेनयज्ञेनवःयुष्मा नभावयंतुतुष्यादिदानेनपरस्परंभावयंतो ॥१५९॥
देवाश्चभावयंतश्रेयःपरमाप्स्यथ॥११॥श्रीरामकृष्णवासुदेव॥

किंवइष्टान्पुत्रपश्वादीश्चवःयुष्मभ्यंअभ्योदेवेभ्यस्तत्तदत्तान्नवैहिपश्वाज्यादीन्अत्रदाय
अकृत्वादेवतोद्देशेनद्रव्यत्यागात्मकंयागंनित्यनैमित्तिकरूपंवैश्वदेवाग्निहोत्रजातेष्टयादिरू

इष्टान्भोगान्हिवोदेवादास्यंतेयज्ञभाविताः॥
तैर्दत्तानप्रदायैभ्योयोमुंक्तेस्तेनएवसः॥१२॥

पंअकृत्वेत्यर्थःअदत्वायोमुंक्तेसस्तेनवै॥१२॥श्रीरामकृष्णवासुदेवायनमः॥सांबशिवायनमः॥

येतुयज्ञशिष्टाशिनःवैश्वदेवादिशेषान्नभोजनशीलाः संतः ऋणपाकरणात्तेमुच्यंतेसर्व किल्बिषैःप्रमादकृतैः विहिताकरणनिमित्तैःपंचसूनातिमित्तैर्वा येवात्मकारणात्स्वार्थमेवप चंति नतुपंचमहायज्ञार्थंतेपापास्वयंपापरूपाएवसंतःपापमेवभुंजंते तथाचस्मृतिःकंडनी

यज्ञशिष्टाशिनःसंतोमुच्यंतेसर्वकिल्बिषैः॥भुंजंतेतेत्वघंपापायेपचंत्यात्मकारणात् १२

पेषणीचुल्लीउदकुंभीचमार्जनी॥पंचसूनाग्रहस्थस्यताभिःस्वर्गंनविंदतीति॥पंचसूनाकृतंपापं पंचयज्ञैर्व्यपोहतीतिच श्रुतिश्चेदमेवास्यतत्साधारणमन्नंयदिदमद्यतेसयएतदुपास्तेन सपाप्मनोव्यावर्तते मिश्रह्येतादितिमंत्रवर्णोपिमोघमन्नंविंदतेअप्रचेताःसत्यंब्रवीमिव ॥१६०॥
घइत्सतस्यनार्यमणंपुष्यतिनोसखायंकेवलाघोभवतिकेवलादीति॥१३॥ श्रीरामकृष्ण।

अ०२६ गी०३

जगच्चक्रप्रवृत्तिहेतुदर्पिकर्मकर्तव्यमित्याह॥अन्नादिति॥अन्नात्रेतोरूपेणपरिणतात्भू तानिप्राणिशरीराणिभवंतिअन्नंचपर्जन्यात् एतत्सिद्धमेव यज्ञाद्भवतिपर्जन्यःअग्नौप्रा

अन्नाद्भवंतिभूतानिपर्जन्यादन्नसंभवः॥यज्ञाद्भवतिपर्जन्योयज्ञःकर्मसमु द्भवः॥१४॥

स्ताहुतिःसम्यगादित्यमुपतिष्ठते॥आदित्याज्जायतेवृष्टिर्वृष्टेरन्नंततःप्रजाइतिस्मृतेःयज्ञो देवताराधनजोधर्मःकर्मभ्योयागहोमदानादिभ्यःसमुद्भवतीतिकर्मसमुद्भवः॥१४॥राम॥

कर्मब्रह्मोद्भवं वेद एव धर्मे प्रमाणंनतुपाखंडादिप्रणीतागमः ब्रह्मवेदोपिअक्षरसमुद्भवं॥ अस्यमह
तोभूतस्यनिश्वसितमेत द्यदृग्वेदो यजुर्वेदइत्यादिश्रुतेः साक्षात्परमेश्वरादवउत्पन्नः अतोनतत्रमं
मविप्रलंभकत्वादिदोषाक्रांतपाखंडानिवाक्यवदप्रामाण्यशंकास्तीतिभावः यस्मादेवंतस्मा

कर्मब्रह्मोद्भवंविद्धि ब्रह्माक्षरसमुद्भवं॥ तस्मात्सर्वगतंब्रह्मनित्यं
यज्ञेप्रतिष्ठितं॥ १५॥

तत्सर्वस्मिन्देशेकालेच वर्त्तमानंब्रह्मवेदः एतेनवेदस्यनित्यत्वंशब्दस्यविभुत्वंचदर्शि
तंनित्यंनियेमनयज्ञेप्रतिष्ठितंतात्पर्येणपर्यवसन्नं॥१५॥श्रीरामकृष्णवासुदेवायनमः॥

CC-BY-NC-SA. BHAU DAJI LAD MUSEUM

भवत्वेवं ततःकिंफलितमित्यतआह॥एवमिति॥भूतानामादौवेदाधिगमस्ततः कर्मज्ञानं
ततः कर्मानुष्ठानं ततोदेवानांतृप्तिस्ततोवृष्टिस्ततोन्नंततोभूतानि तेषांवेदाधिगमइत्ये
वंरूपंचक्रमिवचक्रं निरंतरमावर्त्तमानंजगद्यात्रानिर्वाहकं नानुवर्त्तयति नानुतिष्ठति

एवंप्रवर्त्तितं चक्रं नानुवर्त्तयतीहयः॥
अघायुरिंद्रियारामोमोघंपार्थसजीवति॥ १६॥

सअघायुःपापजीवनःइंद्रियारामोनतुधर्मारामआत्मारामोवामोघंव्यर्थंदंभरामइवका
दिवज्जीवतियस्त्वेतदनुवर्त्तयतिसजगदुपकारकोधन्यइतिभावः तथाचश्रुतिःअथो
अयंवाआत्मासर्वेषांभूतानांलोकः सयत्किंचजुहोतियद्यजतेतेनदेवानांलोकोथयदनु

ब्रूतेतेनऋषीणामथयत्पितृभ्योनिष्क्रीणातियत्प्रजामिच्छतेतेनपितृणामथयन्मनुष्यान्वा
मयतेयद्देभ्योऽन्नंददातितेनमनुष्याणामथपशुभ्यस्तृणोदकंविंदतितेनपशूनाप
दस्यगृहेषुश्वापदावयांस्यापिपीलिकाभ्यउपजीवंतितेनतेषांलोकइति॥१६॥ राम॥

एवमीश्वरेणवेदयज्ञपूर्वकंजगच्चक्रंप्रवर्त्तितमज्ञैरधिक्षेपेरनुवर्त्तितयमित्युक्तं॥अस्या
ननुवर्त्तनेब्रह्मसत्यवायउक्तःसब्रह्मविदमपिस्पृशेदितिसंभाविनामज्ञंकांपरिहर
ति॥यस्त्विति॥आत्मन्येवरतिःप्रीतिर्यस्यननुस्त्र्यादौसतथाननात्मनिप्रीतिःप्राणि

यस्त्वात्मरतिरेवस्यादात्मतृप्तश्चमानवः॥आत्मन्येवचसंतुष्टस्तस्यकार्यं
नविद्यते॥१७॥

मात्रास्यानौपाधिकीअस्तिप्रत्युततदर्थत्वेनैवस्त्र्यादिष्वपिप्रीतिर्भवतीत्यतउक्तं॥आ
त्मतृप्तइति॥आत्मनैवपरमानंदरूपेणतृप्तोनमिष्टान्नादिना ननुमंदाग्निरपिस्त्र्यादौ

नरमते नापिमिष्टान्नि वतृप्यति अतउक्तं आत्मन्येववसंतुष्ट इति॥मंदाग्निर्हिधातृद्धिं
जाठरादीपनंचकामयमानऔषधाद्यर्थमितस्ततो धावतिनत्वात्मन्येवतुष्यतिपि
दांस्तुरतितृप्तितुष्टीरात्मनैवानुभवतिनस्त्र्यन्नधनादिप्रिरितस्यकार्यं कर्तव्यं
किमपिनास्तिक्रियाप्राप्यस्यकस्यचिदप्यर्थस्याभावात्॥१७॥ श्रीरामकृष्णवासुदेव

एतदेवाह॥नैवेति॥तस्यात्मरतेःकृतेनकर्मणाअर्थःप्रयोजनंनास्तिस्वर्गादौतृप्त्याभावा
त्मोक्षस्यचाक्रियासाध्यत्वात्तनाकृतःकृतेनेतिश्रुतेःअकृतोमोक्षःकृतेनकर्मणानास्ती

नैवतस्यकृतेनार्थो नाकृतेनेहकश्चन॥नचास्यसर्वभूतेषु कश्चिदर्थ
व्यपाश्रयः॥१८॥

तिश्रुत्यर्थःअकृतेनविरुद्धकर्मणापिअर्थोनरकादिरस्यनास्ति अत्रकृताकृतत्रद्वौमि
त्रामित्रपदवत्परस्परविरुद्धार्थवाचितयापुण्यपापवचनौयेतुअकृतेनेतिभावे निष्ठा
नित्याकरणात्गर्हितत्वरूपोवाप्रत्यवायप्राप्तिरूपोवाकश्चनार्थोविदुषोनास्तीत्या

वक्षतेतेषामप्यभावाज्ञावोत्पत्तेरनभ्युपगमात् नित्यानां कोलयदन्यदविहितंकि
येततएवप्रत्यवायोत्पादोवक्तव्यइतिघटकुट्यांप्रभावत्तांतआपद्यतद्येते अ
त्रोपपत्तिमाह ॥नवेति॥वोहेतोयस्मात्अस्यआत्मरतेःसर्वभूतेषुचेतनावचेतने
षुउत्तममध्यमाधमेषुकश्चिदपिअर्थव्यपाश्रयःसुखभोगात्मकप्रयोजनाभि
संबंधोनास्तिआत्मरतित्वादेवनिष्कामत्वाद्विदुषःपुण्यपापफलसंबंधोनास्ती
त्यर्थः॥१८॥श्रीरामकृष्णवासुदेव॥

॥१६४॥

यस्मान्निष्कामस्यकर्मलेपोनास्ति तस्मात्वमपिअसक्तःफलशक्तिशून्यःसतत
सर्वदा कार्यंअवश्यकर्तव्यंकर्मनित्यनैमित्तिकं समाचरहियस्मात्असक्तःक

तस्मादसक्तःसततं कार्यंकर्मसमाचर॥
असक्तोह्याचरन्कर्मपरमाप्नोतिपूरुषः॥१९

र्माचरन्परंमोक्षसत्वशुद्धिद्वारेणाप्नोति॥१९॥ श्रीरामकृष्णवासुदेवहरि॥

अत्रशिष्टाचारंप्रमाणयति॥कर्मणेति॥कर्मणैवसहसंसिद्धिंश्रवणादिसाध्योज्ञाननिष्ठांतुंआस्थिताःप्रवृत्ताःजनकादयस्त्वादृशाःक्षत्रियाःनतुसंन्यासिनः।ननुशुद्धचित्तस्यसमनास्तिकर्मापेक्षत्याशंक्याहलोकेति॥लोकस्यसंग्रहःस्वधर्मेप्रवर्त्तनं।ननुस्वप्रयोजनभावेपिकेवलंलोकसंग्रहार्थंचे

कर्मैणैवहिसंसिद्धिमास्थिताजनकादयः॥लोकसंग्रहमेवापीसंपश्यन्कर्तुमर्हसि॥२०

त्कर्मकर्त्तव्यंतदाविदुषोब्राह्मणानामपिसंन्यासोनस्यात्यतीनेवसंन्यासधर्मान्ग्राहयितुंतेषांसंन्यासइतिचेत्अर्जुनेपिनतद्दंडवारितमस्ति॥ननुक्षत्रियस्यसंन्यासेधिकारोनास्तीतिचेत्लिंगधारणेधिकाराभावेपिभरतऋषभादिवद्विक्षेपककर्मत्यागमात्रेऽधिकारात् वार्त्तिकेसर्वाधिकारविच्छेदज्ञा ॥१६५॥

नंवेदभ्युपयेते।कुतोधिकारनियमोव्युत्थानक्रियतेबलादितिविद्वत्संन्यासेक्षत्रियादरपिरधिकारस्यसाधिततत्वात् अतोलोकसंग्रहोनमुख्यंकर्मप्रयोजनमितिचेत्सत्यं नेमपार्थास्तिकर्त्तव्यमितिस्वदृष्टांतेनआधिकारीकृत्वादर्जुनएवंनियोज्यतेनक्षत्रियमात्रमितितुष्यतुभवान्॥२०॥ ॥२१॥

यद्यदाचरतिश्रेष्ठस्तत्तदेवेतरोजनः॥सयत्प्रमाणंकुरुतेलोकस्तदनुवर्त्तते॥२१॥
नेमपार्थास्तिकर्त्तव्यंत्रिषुलोकेषुकिंचन॥नानवाप्तमवाप्तव्यंकर्तएववकर्मणि॥२२॥
यदिह्यहंनवर्त्तेयंजातुकर्मण्यतंद्रितः॥ममवर्त्मानुवर्त्तेतमनुष्याःपार्थसर्वशः॥२३॥

कर्मणिवर्त्तएव अहंकर्मकरोम्येवेत्यर्थः॥२२॥यद्यहंकर्मणिनवर्त्तेहंतर्हिमनुष्याःममैववर्त्मानुवर्त्तेतअवर्त्तेरन्कर्मनकुर्वीरन्नित्यर्थः अतंद्रितोऽनलसःसर्वशःसर्वप्रकारैः॥२३॥ श्रीरामरुद्र।

ततश्चकिमित्यतआहउत्सीदेयुरिति॥यद्यदावातीत्यादरार्थेपिरायोजनाकेवलंलोकसंग्रहंप
श्यन्नकर्तुमर्हसिअपितुश्रेष्ठावारत्वादपीत्याहयद्यदिति॥तथात्वममश्रेष्ठश्चयादृशआचार
स्तादृशएवमदनुवर्त्तिनात्वयाअनुष्ठेयःनस्यात्तेत्रोणाइत्यर्थःकीदृशस्त्वंवारोयमयानुवर्त

उत्सीदेयुरिमेलोकानकुर्यांकर्मचेदहम्॥संकरस्यचकर्त्तास्यामुपहन्यामिमाःप्रजाः॥२४
सक्ताःकर्मण्यविद्वांसोयथाकुर्वंतिभारत॥कुर्याद्विद्वांस्तथासक्तश्चिकीर्षुर्लोकसंग्रहं॥२५

नीयइत्याकांक्षायांनमेपार्थेत्यादिभिस्त्रिभिःलोकैस्तत्प्रदर्शनमितिमधूसूदनश्रीपादाः॥२४॥
यदिमादृशएवत्वंकृतार्थोसिनथापिपरानुग्रहार्थंकर्माणिकुर्वित्याहसक्ताइति कर्मणिकर्मफ
लेकुर्वंतिकर्मणीतित्रोपःअसक्तइतिच्छेदः॥२५॥ श्रीरामकृष्णवासुदेव॥

DR BHAU DAJI ॥१६६॥

विद्वान्अज्ञानांकर्मसंगिनांबुद्धिभेदंबुद्धेश्चालनंनजनयेत्नोत्पादयेत्किंतु

नबुद्धिभेदंजनयेदज्ञानांकर्मसंगिनां॥जोषयेत्सर्वकर्माणि॥
विद्वान्युक्तःसमाचरन्॥२६॥

तान्सर्वाणिकर्माणिजोषयेत्सेवयेत्कथंयुक्तआदृतोभूत्वासमाचरन्॥२६॥श्रीराम॥

अविद्वान्कथंकर्मसु सज्जतइत्यत आह प्रकृतेरिति॥प्रकृतेःपारमेश्वर्याःसत्वरजस्तमोगुणा त्मिकायाःदैवात्मशक्तेःस्वगुणैर्निगूढायामितिश्रुतिषुसिद्धायाःशक्तेःगुणैःकार्यकरणसंघा तात्मकैःक्रियमाणानिकर्माणिअहंकारेणस्वस्मिन्यध्यस्तेनविमूढःतदीयात्कर्तृत्वादीना

प्रकृतेःक्रियमाणानिगुणैःकर्माणिसर्वशः॥अहंकारविमूढात्माकर्ताहमितिमन्यते॥२७

त्मधर्मत्वेनपश्यन्आत्मनश्चअत्रसंगानंदसंविद्रूपतामपश्यन्आत्माअहंकारेणविमूढश्चा सावात्मेतिविग्रहःअहंकर्माणिकर्मणांकर्तेतिमन्यतेकर्तृध्यासेनकर्ताहमितितन्प्रत्ययः तेननलोकाव्यपनिष्ठारवलर्थतृणामितिषष्ठीनिषेधअन्यथातत्प्रत्ययेकर्मणांकर्ताहमि तिषष्ठ्याभाव्यं॥२७॥ ॥१६७॥

एवंसक्तस्यकर्माकरणंप्रदर्श्यासक्तस्यतन्नदर्शयति तत्वविदिति गुणकर्मविभागयोःगु णविभागस्यकर्मविभागस्यचतत्वविदितिभाव्यंनाहंगुणात्मकइतिगुणेभ्यआत्मनो विंभागःनाहंकर्मात्मकइतिकर्मभ्यश्चात्मनोविभागस्तयागुणकर्मविभागयोस्तत्वंवेत्ती

तत्ववित्तुमहाबाहोगुणकर्मविभागयोः॥गुणागुणेषुवर्तंतइतिमत्वानसज्जते॥२८

तिश्रीधरःमधुसूदनस्तुगुणाःदेहेंद्रियांतःकरणानिअहंकारास्यदानिकर्माणितुतेषां व्यापारभूतानिममकारास्यदानि गुणकर्मेतिद्वंद्वैकवद्भावःविभज्यतेसर्वेषांजडानांभास कत्वेनपृथग्भवनीतिविभागःसूत्रकारोजडयोस्तत्तंयोवेत्तिसगुणाःकरणात्मकाःगुणेषुवर्तं +ज्ञानरूपोअसंगआत्मगुणकर्मवविभागश्चेतिद्वंद्वःतयोर्जडा+

तइतिमत्वानसज्यतेकर्तृत्वाभिनिवेशंनंनकरोतीत्यर्थः गुणविभागस्यकर्मविभागस्यवतत्व
विदितिपक्षेगुणकर्मणोरित्येवसिद्धेविभागेपदंव्यर्थमिति यद्वायस्तत्त्ववित्तमःगुणागुणेषुव
र्तेनइतिमत्वागुणविभागेकर्मविभागेवनसज्जतेइतियोजना गुणानांसत्वरजस्तमसांविभागः
बुध्यहंकारज्ञानेंद्रियविषयरूपेणविभज्यावस्थानेनस्मिन्नसज्यतेइदमहमितिनमन्यते त
थाहीश्वरोगौरोस्मिहस्ताभ्यामात्तमयदमात्तमितिचक्षुषादृष्टमयंदृष्टमितिअहंकारेणाभि
मंतंममेदमित्यभिमन्यतेबुद्धौविक्रियमाणायामहंसुखीतिचसर्वेषुबुध्यादिषुविभज्यगृह्यमा
णेष्वपिप्रत्यक्षंप्रत्युक्तंमध्यस्थाहमिदमितिममेदंकर्मेतिचमन्यते एतेनकर्मविन्नव्याप्याकूत्व ॥१९८
कत्वेनव्याख्यातःअन्यथाविदात्मन्येवअदानादिकर्तृत्वंदुःखादिमत्वंवापततिअयंचकर्मविभा
गःश्रुत्यापिदर्शितःअधोमणिमविंदत् तमनंगुलिरावपत्तअग्रीवःपत्यमुंवतत्तमजिह्वोअसश्चते

तिअंधःस्वयंप्रकाशहीनोपिचक्षुरादिर्मणिंरूपादिकंविषयंअविंदत्प्रकाशयति अनंगुलिः
काष्ठलोष्टादिवत्जडत्वात्स्वयंकर्मकर्तुमशक्तोपिपाण्यादिःआवपत्अर्जीव्यत् विषयंउपा
दत्तेअग्रीवःछिन्नशिरस्कवन्निर्जीवोहंकारस्तंप्रत्यमुंवत् ग्रीवायांधारयतिमयेदंलब्धमिति
मन्यतेअजिह्वोधीधातुःजडत्वात्स्वगतसुखदुःखयोः घटइवस्वगतरूपादेःप्रकाशनेअसमर्थो
पिअहंसुखीदुःखीतिवानुभवति तथाचआत्मानात्मनोर्यथात्मज्ञः व्यावृत्तेष्वहंकारादिषुतत्क
र्मसुचाभिमानादिषुकुसुंभेषुसूत्रमिवानुवर्तमानंआत्मानंतेभ्यःपृथग्भूतंजानन्गुणाःधीवक्षु
रादयःगुणेषुदुःखरूपादिषुवर्तंतेनत्वान्मेतिमत्वानसज्यतेहेमवहस्तादिसंघातरूपोममेवेदमा
सनादिकंकर्मेतिनमन्कोभवतीत्यर्थः२८॥ श्रीरामकृष्णवासुदेवायनमः॥श्रीनारायणायनमः॥

एवंसकामकयोःकर्मणिविभज्यसकलकर्मानुवादपूर्वकंनबुद्धिभेदंजनयदज्ञानामित्युपक्रांत
मुपसंहरतिप्रकृतेरिति॥गुणैरहंकारादिभिःस्वस्मिन्नध्यस्तैःसंमूढाःएकीभावेनअनेदा
ध्यासेनमूढास्तुप्रकृतेःप्रकृतिसंबंधिषुगुणेषुदेहादिषुकर्मसुगमनादिषुवसज्जंतेअहमयं

प्रकृतेर्गुणसंमूढाःसज्जंतेगुणकर्मसु॥तानकृत्स्नविदोमंदान्कृत्स्नविन्नविचालयेत्२९

ब्राह्मणाममेवेदंयज्ञादिकंकर्मेतिमज्जंतेसकामवंतितान्मूढत्वात्अकृत्स्नविदःआत्मज्ञान
हीनान्आविद्वित्कृत्स्नवित्आत्मनोवाअरेदृष्टेनिनश्रवणेनमत्याविज्ञानेनेदंसर्वंविदितमिति
श्रुतेःमंदान्ज्ञात्वार्थग्रहणासमर्थान्कृत्स्नवित्आत्मविन्नविचालयेत्कर्मनिष्ठतानभ्रंश
वेयन्तेषांउभयभ्रष्टत्वापत्तेःप्रकृतेर्गुणैःसंमूढाःगुणानांकर्मसुसज्जंतइत्रावांयोजना॥२९॥

॥१६९॥

मयीति॥त्वंतुअज्ञोमुमुक्षुश्चमयिसर्वाणितयामिणिसर्वाणिकर्माणिसन्यस्यसमर्प्यअध्या
त्मचेतसाआत्मानमधिकृत्यप्रवृत्तंशास्त्रंअध्यात्मंतत्रप्रवणनचेतसाशुकपार्थिवादिव
न्मध्यमपदलोपीसमासःआत्मानात्मविवेकवतेत्यर्थःईश्वरप्रेरितोहंकरोमीत्यनयाबुध्या

मयिसर्वाणिकर्माणिसन्यस्याध्यात्मचेतसा॥निराशीर्निर्ममोभूत्वायुध्यस्वविगत
ज्वरः॥३०॥येममतमिदंनित्यमनुतिष्ठंतिमानवाः॥श्रद्धावंतोनसूयंतोमुच्यंतेतेपिकर्मभिः३१

निराशीःफलमनिच्छन्निर्ममोलब्धेममात्वाभिमानशून्यश्चभूत्वायुध्यस्वविगतज्वरोविशोकः
सन्॥३०॥येमइति॥येन्यपित्वादृष्टाःमेममतंअसकृत्कर्मानुष्ठानंअनुतिष्ठंतिअनुवर्तंते
मानवाःश्रद्धावंतःअनसूयंतोअत्रदोषमपश्यंतःतेपिस्वकर्मभिर्धर्मोपधर्मरूपैःमुच्यंते॥३१॥

विपक्षेदोषमाहयत्विति॥सर्वज्ञादीश्वरवादी सर्वसमाप्नोषितोभिसर्वइतिनिर्वचनात्तस्यज्ञा
नविषयविशेषणमूढान्पाराक्ष्येणापितेईश्वरामतानेतोदेहमात्रनिष्ठांस्तान्नष्टान्स्वर्गापव
र्गभ्रष्टान्अवेतसःविवेकशून्यात्३२॥ननुतेवन्नवमतेनानुतिष्ठंतितर्हिकथंतवांतर्यामित्वमित्य

येत्वेतदभ्यसूयंतोनानुतिष्ठंतिमेमतं॥सर्वज्ञानविमूढांस्तांविद्धिनष्टानवेतसः॥३२
सदृशंचेष्टतेस्वस्याःप्रकृतेर्ज्ञानवानपि॥प्रकृतिंयांतिभूतानिनिग्रहःकिंकरिष्यति॥३३

तआहसदृशमिति॥स्वस्याःप्रकृतेःस्वकीयस्यप्राग्भवीयधर्माधर्मसंस्कारस्यसदृशमनुरूपंज्ञान
वानपिचेष्टतेकिमुमूर्खपश्वादिभिश्चाविशेषादितिन्यायात्तस्मात्प्रकृतिंयांतिअनुसरंतिभूता
निप्राणिनःतत्रमनवोऽन्यस्यवानिग्रहःकंकरिष्यतिनकिमपिअहमपिपूर्वकर्मापेक्षयैवतान्प्रवर्तया

एवंतर्हिपुरुषस्यस्वातंत्र्याभावाद्विधिनिषेधशास्त्रंव्यर्थमित्याशंक्याह॥इंद्रियस्येति द्विर्वचनं
वीप्सायां प्रतींद्रियंस्वस्वेर्थेशब्दादौवचनादौवविषयरागद्वेषौअनुकूलेरागःप्रतिकूलेद्वेषश्च
व्यवस्थितौनित्यंसंबद्धौ तत्रतयोर्वशंनगच्छे दितिशास्त्रस्याप्यनुज्ञापुरुषस्यवतदनुष्ठानेसा

इंद्रियस्येंद्रियस्यार्थेरागद्वेषौव्यवस्थितौ॥तयोर्नवशमागच्छेत्तौह्यस्यपरिपंथिनौ॥३४॥

तंत्र्यमस्तिहितयःनोरागद्वेषावेवास्यप्राणिनःपरिपंथिनौदृष्टांतेनप्रवर्तकत्वात्ननुईश्वरस्य
परिपंथीतस्यवैषम्यादिदोषापत्तेःअयंभावःयथाह्यस्वेननस्वाज्ञोल्लंघनजेनापराधेनकुपितो
राजाऽपराधिनंहिनिगडादौनिगृह्णीतुंस्वीयान्पुरुषान्प्रवर्तयतिसएवाघतनेनदानमानेनप्रसा
दितएनंतेषामेवपुरुषाणामाधिपत्येनियुंक्ते एवंपूर्वकर्मानुसारीईश्वरोरागादिद्वारापुरुषंबाधमा

नोपिविधिप्रतिषेधशास्त्रानुसारिणातेनैवभक्तिध्यानप्रणिधानेनावर्जितःएनंरागादिजेयनियुंक्ते तस्माद्विधिप्रतिषेधशास्त्रस्यनानर्थक्यंपुरुषस्यस्वातंत्र्यसत्वात्नापीश्वरवैषम्यादिकंप्राणिकर्मयत्नत्वादिति॥३४॥ ॥यस्मादेवंतस्मात्श्रेयान्परःस्वधर्मस्विस्यवर्णाश्रमाश्रेयान्स्वधर्मोविगुणःपरधर्मात्स्वनुष्ठितान्॥स्वधर्मेनिधनंश्रेयःपरधर्मोभयावहः॥३५

नुरूप्येणईश्वरेणविहितत्वात् विगुणाहिंसादिभिश्रोपिकिंविदंगहीनोपिपरधर्मान्हिंसदोषरहितपरधर्मापेक्षयास्वनुष्ठितात्सर्वांगोपसंहारेणसम्यगनुष्ठितादपिसएवश्रेयान् स्वधर्मयुद्धादोनिधनंमरणमपिश्रेयःविहितत्वात्परस्यधर्मोभैक्षवर्यादिर्भयावहःक्षत्रियस्यतवनिषिद्धत्वान् तस्मात्स्वतंत्रेणत्वयास्वधर्मएवानुष्ठेयइतिभावः॥३५॥ श्रीरामकृष्णवासुदेव॥

DR BHAU DAJI

ईश्वरोधर्माधर्मौरागद्वेषौवापुरुषस्यप्रवर्तकोभवतइतिआत्मनोस्वातंत्र्यंमन्वानोर्जुनउवाच॥ अथकेनेति॥केनईश्वरादीनामन्यतमेनान्येनवाप्रयुक्तःप्रवर्त्तितःसन्नयंपुरुषंपापंमनिच्छंवरति करोति अनिच्छन्नित्यनेनरागद्वेषयोःप्रवर्तकत्वंनिरस्तं सतिहिरागेइच्छाभवतिअतःइच्छया

अर्जुनउवाच॥ अथकेनप्रयुक्तोयंपापंचरतिपूरुषः॥ अनिच्छन्नपिवार्ष्णेय बलादिवनियोजितः॥३६॥

अभावःरागस्याप्रवर्तकत्वेनन्मूलभूतसंस्कारहेतोर्धर्माधर्मयोरप्रवर्तकत्वं ततश्चतत्सापेक्षस्यईश्वरस्यापीतिसर्वेषामाक्षेपः तस्मात्सुरयंप्रवर्तकंयत्तद्वाच्यमित्यर्थःबलादिवनियोजितःविशेषहीनइवेत्यर्थः॥३६॥श्रीरामकृष्णवासुदेव॥

THE ASIATIC SOCIETY OF BOMBAY Established in 1804 Town Hall Bombay-400 023 amtec

अत्रोत्तरं काममयाएवायंपुरुषइत्यादिश्रुतिमिहश्रीभगवानुवाच॥कामएषइति॥एषप्रसिद्धःकामः सोकामयतजायामस्यादथप्रजायेयाथवित्तंमेस्यादथकर्मकुर्वीपतिश्रुतेरिदंमेभूयादिदंमेभूयादिति तीव्राभिलाषहेतुभूतश्चेतसोऽनवस्थितत्वापादकोरतिविशेषःसवैवनोरूपएवकामःसंकल्पइत्यु

श्रीभगवानुवाच॥कामएषक्रोधएषरजोगुणसमुद्भवः॥महाशनो
महापाप्मा विद्ध्येनमिह वैरिणं॥३७॥

पक्रम्यएवतत्सर्वमनुपसंहारात् सएषकामःकेनचिन्निमित्तेनप्रतिहतः क्रोधरूपेणपरिणम
तेऽतःक्रोधोभिज्वालनात्माप्येषएंव तमेनमिहमनुष्यशरीरेऽतःस्थितंवैरिणंविद्धिकुतोवैरी यद्वारजो गुणसमुद्भवः रजोरंजनात्मकःप्रकृतोगुणःसत्त्वस्यगुणोकार्यभूतोतृष्णासंगौतावेवउद्भवोयस्य सरजःकार्यत्वादुःखैकफलोपमतोवैरीयद्वारजोगुणस्यलोभप्रवृत्यादिलक्षणस्यसमुद्भवोयस्मात्

ननुविषयाभिलाषात्मकःकामोविषयार्पणेननश्याम्यतिविषयस्यदौर्लभ्यनिश्चयेस्वतएव नानिवर्त्ततेअंधइवरूपदर्शनाभिलाषादित्याशंक्याह महाशनोमहापाप्मेति महतदानुम पारणीयंअन्नानमस्यसतथायथोक्तेनजातुकामः कामानामुपभोगेनशाम्यतिहविषाकृ ष्णवर्त्मेवभूयएवाभिवर्धतेइतियतृप्तिर्व्रीहियवंहिरण्यंपशवःस्त्रियःनास्तिमेकस्यत त्सर्वमितिमत्वाशमंव्रजेदितितथामहापाप्माअत्युग्रःसहिसहस्रशःप्रबोधितोपिननिवर्त तेतद्वदयमपिदुष्पूरकिन्तुमहाशनत्वान्नायंवैरीदानसाध्यःनापिसामभेदसाध्योअत्युग्र त्वान्अतोहंतव्यएवेति॥३७॥ श्रीरामकृष्णवासुदेवनारायण॥

अस्यवैरित्वमवविवृणोतिधूमेनेत्यादिनाउल्बेनगर्भवेष्टेननजरायुणातेनकामेनइदंवक्ष्यमा

धूमेनाव्रियतेवन्हीर्यथादर्शोमलेनच॥यथोल्बनावृतो
गर्भस्तथातेनेदमावृतं॥३८॥

॥१७३॥

णंज्ञानंआवृतं आवरणीयस्यत्रैविध्यात् तदनुगुणंदृष्टांतत्रयंज्ञेयं॥३८॥श्रीरामकृष्ण

आवृतमिति-ज्ञानंअंतःकरणमत्रंद्धीर्धीरित्येतत्सर्वंमनएवेतिश्रुतेःएतेनकामेनरजोगुणात्मकेन
आवृतंज्ञानिनःअंतःकरणविशिष्टस्यप्रमातुःनित्यवैरिणाकामरूपेणदुःपूरेणपूरयितुमयोग्येन
अयंहिपूर्यमाणोऽनर्थानेवप्रसवेन् अनलेनअथापिपूर्यतेवेन् आनलःनास्त्यलंपर्याप्तिर्यस्यसत

आवृतंज्ञानमेतेन ज्ञानिनोनित्यवैरिणा॥कामरूपेणकौंतेयदुष्पूरेणानलेनच॥३९॥

थेतेनानलेननह्यनलःकाष्ठैस्तर्पयितुंशक्यःकिंतुवर्धतएवतद्वदयमपीत्यर्थःअयंभावःअंतःक
रणमत्रंहिप्रकाशात्मकंतत्सहजेनकामेनवह्निरिवधूमेनआवृतंवेत्प्रमातरंअनर्थंपातयति
अन्यथातद्वस्वभावशुद्धत्वात् विवेकवैराग्योपगंभूत्वातमुद्धरेत् अतोयंकामोज्ञानिनोनित्यवै
रीति॥३९॥रामकृष्णहरि॥

किंवइंद्रियाणीति अयमर्थःइंद्रियमनोबुद्ध्योहिकर्मनाधिष्ठिताःबाह्यार्थप्रवणाभवंतितैश्चतथा
भूतैरयंकामःज्ञानंविदाकाशरूपआदर्शोतत्प्रत्यूयंयत्रयोगिनोव्यवहितंविप्रकृष्टमतीतम
नागतंवापश्यंतियथोक्तमाचार्यैःविश्वंदर्पणदृश्यमाननगरीतुल्यंनिजांतर्गतंशरीरांतर्गतंआ
+पश्यंत्यात्मनीतिनिजांतर्गतं+

इंद्रियाणिमनोबुद्धिरस्याधिष्ठानमुच्यते॥एतैर्विमोहयत्येषज्ञानमावृत्यदेहिनं॥४०॥

त्मनिहार्दाकाशाख्येब्रह्मणितन्मलेनआदर्शोमिवआवृत्यदेहिनंदेहाभिमानिनंविशेषणमो १७४॥
हयतिविप्रकृष्टदेहाभिमानशून्ययोगिनमपिव्युत्थानावस्थायांकिंविन्मोहयतीतिगम्यतइतिअ
क्षरयोजनास्पष्टा॥४०॥श्रीराम॥

तस्मादितियस्मादिंद्रियाण्यस्याधिष्ठानंसामंतस्यैवगिरिदुर्गादिकंतस्मात्तान्येवनियम्यवशी
कृत्यएनंकामंहिनिश्चयेनत्रजहिप्रकर्षेणनाशयगिरिदुर्गादीन्स्वापत्तीकृत्यवतत्स्थंसामंतघ्न

तस्मात्त्वमिंद्रियाण्यादौनियम्यभरतर्षभ॥पाप्मानंप्रजहिह्येनं
ज्ञानविज्ञाननाशनं॥४१॥

तिराजानस्तद्वत्हंतव्येहेतुःपाप्मानंअत्युग्रंतत्रापिहेतुःज्ञानविज्ञाननाशनमितिज्ञान
स्यशास्त्राचार्योपदेशजस्यपरोक्षस्यविज्ञानस्यनिदिध्यासनपरिपाकजस्यापरोक्षस्यवना
शनं॥४१॥

नकेवलंबाह्येंद्रियजेयेनवरु तार्थतंकिंतुमनोबुध्यारपिजपिजयःकर्तव्यःकामस्यसमूलोच्छदायत्रिः
प्राकारकदुर्गस्थस्यसामंतस्यवाभ्यंतरप्राकारद्वयजयेन अतोमनोबुध्योर्जयार्थंयोगंदर्शयति॥
इंद्रियाणीति अत्रपरत्वंसूक्ष्मत्वेनबोध्यंइंद्रियाणिचक्षुरादीनिपराण्यस्वविषयेभ्यःपृथिव्यादिस्था

इंद्रियाणिपराण्याहुरिंद्रियेभ्यःपरंमनः॥मनसस्तु
पराबुद्धिर्योबुद्धेःपरतस्तुसः॥४२॥

श्रयसहितेभ्योगंधादिभ्योवित्तपुत्रशरीरेभ्यश्चतेषांतत्कारणत्वात् तथाचकौशीतकिनःसमाम
नंतिप्राणेभ्योदेवादेवेभ्योलोकाइतिव्युच्चरंतीत्यनुषज्यंते प्राणेभ्यइंद्रियेभ्यःदेवास्तदधिष्ठात्र्यादे ॥१७५॥
वताःउत्पद्यंतेदेवेभ्यश्चलोकाःभूतभौतिकाउत्पद्यंतइतिश्रुत्यर्थः इंद्रियेभ्यःपरंमनःमनसाह्यवपश्य

तिमनसाश्रृणोतीतिश्रुतेःरिंद्रियाणांमनोविकारत्वात्तेनबाह्यार्थेभ्यइंद्रियाण्याकृष्यमनसिप्रविला
पनीयानीतिदर्शितंकेवलंपरत्रमात्रप्रतिपादनेप्रयोजनाभावात् मनसस्तुपराबुद्धिःतस्माद्वाएतस्मा
द्वाएतस्मान्मनोमयात्अन्योन्तरात्माविज्ञानमयइतिश्रुतेःमनसःप्रक्लापनंतत्कारणेबुद्धौकर्तव्य
मित्यर्थःसमष्टिव्युद्भरण्यत्रैवांतर्भावःयोबुद्धेःपरस्तुसःयस्तुतुरीयोभास्यर्थवर्णात्बुध्यादेर्भासकत्वज्ञा
नस्यवलक्षण्यंगमयतियोबुद्धेरपिपरतःसःज्ञानपदाभिधेयःकोमनआरुतइतिव्यवहितेनसंबं
धःतथाचश्रुतिःयच्छेद्वाङ्मनसीप्राज्ञस्तद्यच्छेज्ज्ञानआत्मनिमहतिनियच्छेच्छांत आत्मनीतिएतदुक्तं
भवतिवागादिबाह्येंद्रियव्यापारउत्सृज्यमनोमात्रेणावतिष्ठतमनोपिविषयविकल्पात्मिकंज्ञानात्मता
द्वारितायांबुधौधारयेत्तामपिमहत्यात्मनिसमष्टिबुद्धौधारयेत्ततस्तंमहांतमात्मानंज्ञानेनिष्कलेपं

योगफलमाहएवमिति॥आत्मानंमनःहार्दकाशेतत्स्थान्नित्यान्कामान्कामयानंश्रूयंते
हिदहरविद्यायांहार्दकानांप्रकृत्यवाऽस्यहास्तियच्चनास्ति सर्वंतदत्रगत्वाविंदतइतितत्रेत्या

एवंबुद्धेःपरंबुद्धासंस्तभ्यात्मानमात्मना॥जहिशत्रुंमहाबाहोकामरूपंदुरा
सदं॥४३॥ ॥इतिश्रीभगवद्गीतासूपनिषत्सुब्रह्मविद्यायांयोगशास्त्रेश्रीकृष्णा
र्जुनसंवादेकर्मयोगोनाम तृतीयः॥७



नांकामानांमलंतेषांवमत्यलंतइमेमत्याःकामाइतिश्रुतेःआत्मानंमनःआत्मनामनसैवबुध्येवा
संस्तभ्यनिर्वृत्तिंकृत्वाबुद्धेःपरंपरमात्मानंबुध्यासम्यगवष्टभ्यात्मानंकामरूपंशत्रुंशातयितारंजहिनाश
यैहमहाबाहोइतिसंबोधयन्तन्नाशनेवसामर्थ्यमस्तीतिदर्शयति अयमर्थः यावत्तत्कामंमूलस्य

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

इममेवबुद्धियोगंस्तौतिदूरेणेतिकर्मफलकामनाक्रियमाणंबुद्धियोगात्पूर्वकान्निष्कामात्कर्मणःदूरेणह्यवरं
निकृष्टंअत्यल्पमत्यंतनिकृष्टंअतोबुद्धौयोगरूपायांतत्फलभूतायांसांख्यरूपायांवातन्निमित्तंशरणंरक्षितारंआ

दूरेणह्यवरंकर्मबुद्धियोगाद्धनंजयबुद्धौशरणमन्विच्छकृपणाःफलहेतवः॥४९॥

श्रयंवाऽश्वरंअन्विच्छप्रार्थयस्वतत्कीत्यर्थंकर्माणिकुर्वीत्यर्थःयतःफलहेतवःफलमेवहेतुःप्रकर्तृनंयेषां ॥१३८॥
तादृशाःफलतृष्णावंतःकृपणाःदीनाःभवंतियोवाएतदक्षरंगार्ग्यविदित्वास्माल्लोकात्प्रैतिसकृपणइतिश्रुतेः४॥

किंचबुद्धीतिबुद्धियुक्तःसमत्वबुद्धियुक्तःयोगायसमत्वबुद्धियोगायत्वंयुज्यस्वघटस्वयोगःसिद्ध्यसिध्योस
मत्वबुद्धिःकर्मसुबंधकेष्वपिकौशलंबंधनिवर्तकत्वसंपादनंननुबुद्धियुक्तःकर्मभिःदुष्कृतेत्यत्रदुष्कृतधर्मेण
पापमपनुदतीतिश्रुतेःसुकृतंतुसजातीयत्वात्तैःदुःपरिहरमितिकथंउभेसुकृतदुष्कृतेजहातीत्युच्यतेसत्व

बुद्धियुक्तोजहातीहउभेसुकृतदुष्कृते॥तस्माद्योगायत्वंयुज्यस्वयोगःकर्मसुकौशलं॥५०॥

शुद्धिज्ञानोत्पत्तिद्वारेतिप्रांवःअर्वाक्त्वंदुष्कृतत्यागमुक्त्वाभ्युपेत्यफलत्यागात्सुकृतत्यागोपिकर्मयोगि
नोभवतिदुष्कृतफलवन्मोक्षप्रतिबंधकतत्फलस्यनुत्पादात्यस्तुआपत्तंवोक्तमृक्षनिदर्शनेननांतरीय
कंसुकृतफलमुक्तंनतत्फलत्वेनोपपद्यतेनांतरीयकत्वादेवतस्मात्फलद्वारामोक्षप्रतिबंधकेक्रियमाणएव
सुकृतदुष्कृतेकर्मयोगीजहातिज्ञानीतुसंचितेअपितेजहातीतितयोर्विशेषइत्याहुः॥५०॥